नं. ५०२६ तः ५०३४ पर्यन्तम्

क्र. तः देवी माहात्म्यं

ज. अन्ये. भवानी सहस्रनाम.
अष्ट पुस्तकानि

पत्र. २२ (सर्वेषां) —— सं.

विषयः भक्तिः पुराण माहात्म्यं
तन्त्रं

क देवीमाहात्म्य द्वितीयतृतीय
रहस्यकम्
मार्कण्डेयपुराणे

ख देवीसूक्तं रुद्रयामले २

ग लघुस्तवः पंचस्तव्याम् १

घ इन्द्राक्षी स्तोत्रम् १

ङ. महिम्न स्तोत्रम् २

च सौन्दर्यलहरी ४

छ रामहृदयम् अध्यात्मरामायणे १

ज भवानीनामसहस्रम् रुद्रयामले १५

५०२७ —— पत्र ४

गुणा तामसा देवी सात्विकी या त्रिधोदिता सा शिवा चंडिका दुर्गा भद्रा भगवतीं नृप १ योगनिद्रा हरेरुक्ता महा
काली तमोगुणा मधुकैटभनाशार्थं यां तुष्टावांबुजासनः २ दशवक्त्रा दशभुजा दशपा
दांजनप्रभा विशालया राजमाना त्रिंशल्लोचनमालया स्फुरद्दशनदंष्ट्रा सा भीमरूपापि भूमिप।
मा रूपसौभाग्यकांतीनां सा प्रतिष्ठा महाश्रियः ४ खड्गबाणगदाशूलशंखचक्रकपालभृत्
परिघं कार्मुकं शीर्षं निश्च्योतद्रुधिरं दधौ ५ एषा सा वैष्णवी माया महाकाली दुरत्यया आराधिता व
शीकुर्यात्पूजाकर्तुश्चराचरं ६ सर्वदेवशरीरेभ्यो याविर्भूतामितप्रभा त्रिगुणा सा महालक्ष्मीः सा
क्षान्महिषमर्दिनी ७ श्वेतानना नीलभुजा सुश्वेतस्तनमंडला रक्तमध्या रक्तपादा नीलजंघो
रुरुन्मदा ८ सुचित्रजघना चित्रमाल्यांबरविभूषणा चित्रानुलेपना कांतिरूपसौभाग्यशा
लिनी ९ अष्टादशभुजा पूज्या सा सहस्रभुजा सती आयुधान्यत्र वक्ष्यंते दक्षिणाधःकरक्र
मात् १० अक्षमाला च कमलं बाणोऽसिः कुलिशं गदा चक्रं त्रिशूलं परशुः शंखो घंटा च पाश
कः ११ शक्तिर्दंडश्चर्म चापं पानपात्रं कमंडलुः अलंकृतभुजामेभिरायुधैः कमलासनां १२
सर्वदेवमयीमीशां महालक्ष्मीमिमां नृप पूजयेत्सर्वलोकानां स देवानां प्रभुर्भवेत् १३ गौरी
देहात्समुद्भूता या सत्वैकगुणाश्रया साक्षात्सरस्वती प्रोक्ता शुंभासुरनिबर्हिणी १४ दधौ चाष्टभु
जा बाणमुसले शूलचक्रभृत् शंखं घंटां लांगलं च कार्मुकं वसुधाधिप एषा संपूजिता भक्त्या
सर्वज्ञत्वं प्रयच्छति निशुंभमथनी देवी शुंभासुरनिबर्हिणी १६ इत्युक्तानि स्वरूपाणि मूर्तीनां त
व पार्थिव उपासनं जगन्मातुः पृथगासां निशामय १७ महालक्ष्मीर्यदा पूज्या महाकाली सरस्व
ती दक्षिणोत्तरयोः पूज्ये पृष्ठतो मिथुनत्रयम् विरंचिः स्वरया मध्ये रुद्रो गौर्या च दक्षिणे वामे लक्ष्म्या

मा

दु॰ स्या हृषीकेशः पुरतो देवतात्रयं १९ अष्टादशभुजा मध्ये वामे चास्या दशानना दक्षिणेऽष्टभुजा लक्ष्मीर्म्मह
द्वा ११ त्यार्च्चयथाक्रमं २० अवादिदलतः पूज्याः सिंतागाघरभैरवाः अष्टादशभुजा चैषा यदा पूज्या नराधिप २१
दशानना चाष्टभुजा दक्षिणोत्तरयोस्तथा दशानना यदा पूज्या दक्षिणोत्तरयोस्तथा २२ कालमृत्यू
च संपूज्यौ सर्वारिष्टप्रशान्तये यदा चाष्टभुजा पूज्या शुम्भासुरनिवर्हिणी २३ दशानना चाष्टभु
जा सुंभासुरनिवर्हिणी न चास्याः शक्तयः पूज्यास्तदा रुद्रविनायकौ २४ नमो देव्या इति स्तोत्रैर्महा
लक्ष्मीं समर्चयेत् अवतारत्रयार्चायां स्तोत्रमंत्रास्तदाश्रयाः २५ अष्टादशभुजा चैषा पूज्या महिष
मर्द्दिनी महालक्ष्मीर्महाकाली सैव प्रोक्ता सरस्वती २६ ईश्वरी पुण्यपापानां सर्वलोकमहेश्व
री महिषांतकरी येन पूजिता स जगत्प्रभुः २७ पूजयेज्जगतां धात्रीं चंडिकां भक्तवत्सलां अर्घा
दिभिरलंकारैर्गन्धपुष्पैस्तथोत्तमैः २८ धूपैर्दीपैश्च नैवेद्यैर्नानाभक्ष्यैः समन्वितैः रुधिराक्तेन
बलिना मांसेन सुरया नृप २९ प्रणामाचमनीयेन चंदनेन सुगंधिना सकर्पूरैश्च ताम्बूलैर्भक्ति
भावसमन्वितैः २९ वामभागे ग्रतो देव्याः छिन्नशीर्षं महासुरं पूजयेन्महिषं येन प्राप्तं सायु
ज्यमीशया ३० दक्षिणे पुरतः सिंहं समग्रं धर्ममीश्वरं वाहनं पूजयेद्देव्याः धृतं येन चराच
रं ३१ ततः कृतांजलिर्भूत्वा स्तुवीत चरितैरिमैः अथवा तस्तुवंधी मां नस्यामेकाग्रमानसः ३२
एकेन वा मध्यमेन नैकेनेतरयोरिह चरितार्धं न च जपेज्जपंश्छिद्रमवाप्नुयात् ३३ स्तोत्रमंत्रैः
स्तुवीतैनां यदि वा जगदंबिकां प्रदक्षिणानमस्कारान् कृत्वा मूर्ध्नि कृतांजलिः ३४ क्षमापयेज्ज
गद्धात्रीं मुहुर्मुहुरतन्द्रितः प्रतिश्लोकं च जुहुयात् पायसं तिलसर्पिषा जुहुयात् स्तोत्र
मंत्रैर्वा चंडिकायै शुभं हविः भूयो नामपदैर्देवीं पूजयित्वा समाहितः ३५ प्रयतः प्रां
जलिः प्रह्वः प्रणम्यारोप्य चात्मनि सुचिरं भावयेद्देवीं चंडिकां तन्मयो भवेत् ३६

एवंयःपूजयेद्भक्त्याप्रत्यहंपरमेश्वरीम् भुक्त्वाभोगान्यथाकामान्देवीसायुज्यमाप्नुयात् ३८ योन
पेत्पूजयाद्भक्त्याचंडिकांभक्तिवत्सला भस्मीकृत्यास्यपुण्यानिनिर्दहेत्परमेश्वरी ३९ तस्मात्पू
जयभूपालसर्वलोकमहेश्वरी यथोक्तेनविधानेनचंडिकांसुखमाप्स्यसि ४० इतिश्रीमा
र्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवीमाहात्म्येप्रकृतिकंरहस्यंनामद्वितीयं २ ऋषिरुवाच
नंदाभगवतीनामयाभविष्यतिनंदजा सास्तुतापूजिताध्यातावशीकुर्याज्जगत्त्रयं १ कनको
त्तमकांतिःसासुकांतिकनकांबरा देवीकनकवर्णाभाकनकोत्तमभूषणा २ कमलांकु
शपाशाब्जैरलंकृतचतुर्भुजा इंदिराकमलालक्ष्मीःसाश्रीरुक्मांबुजासना ३ यारक्त
दंतिकानामदेवीप्रोक्तामयानघ तस्याःस्वरूपंवक्ष्यामिशृणुसर्वभयापहं पठित्वा
सर्वपापेभ्योमुच्यतेनात्रसंशयः रक्तांबरारक्तवर्णारक्तसर्वांगभूषणा ५ रक्तायुधार
क्तनेत्रारक्तकेशातिभीषणा रक्ततीक्ष्णनखारक्तदशनारक्तदंतिका ६ पतिंनारी
वानुरक्तादेवीभक्तंभजेज्जनं वसुधेवविशालासासुमेरुयुगलस्तनी ७ दीर्घौलं
बावतिस्थूलौतावतीवमनोरमौ कर्कशावतिकांतौतौसर्वानंदपयोनिधी ८
भक्तान्संपाययेद्देवीसर्वकामदुघौस्तनौ खड्गंपात्रंचमुसलंलांगलंचबिभर्तिसा ९
आख्यातारक्तचामुंडादेवीयोगेश्वरीतिच अनयाव्याप्तमखिलंजगत्स्थावर
जंगमं १० इमांयःपूजयेद्भक्त्यासव्याप्नोतिचराचरं अधीतेयइमंनित्यंरक्त
दंत्यावपुस्तवं ११ तांसापरिचरेद्देवीपतिंप्रियमिवांगना शाकंभरीनीलव

दु॰ तीनीलोत्पलविलोचना १२ गंभीरनाभिस्त्रिवलीविभूषिततनूदरी सुकर्कशसमोत्तुंगवृत्तपीनघ
१२ नस्तनी १३ दृष्टौशिलीमुखापूर्णंकमलंकमलालया पुष्पपल्लवमूलादिफलाढ्यंशाकसंचयं १४
द्वा काम्यानंतरसैर्युक्तंक्षुत्तृण्मृत्युज्वरापहं कार्मुकंचस्फुरत्कांतिबिभ्रतीपरमेश्वरी १५ शाकंभ
रीशताक्षीसासैवदुर्गाप्रकीर्तिता उमागौरीसतीचंडीकालिकासाचपार्वती १६ विशोकादु
ष्टदमनीशमनीदुरितापदः शाकंभरीस्तवंध्यायंजपन्संपूजयन्नमन् १७ अक्षय्यमश्नुतेशी
घ्रमन्नपानरसान्बहून् भीमापिनीलवर्णासादंष्ट्रादशनभासुरा विशाललोचनानारी
पीनोन्नतपयोधरान् चंद्रहासंचडमरुंशिरःपात्रंचबिभ्रती १८ एकवीराकालरात्रिःसैवो
क्ताकामदास्तुता तेजोमंडलदुर्धर्षाभ्रामरीचित्रकांतिभृत् २० चित्रानुलेपनादेवीचित्रा
भरणभूषिता चित्रभ्रमरपाणिःसामहामारीतिगीयते २१ मेधाप्रज्ञातथाश्रद्धाधारणा
कांतिरेवच भवंतिस्तुवतोनित्यंचाहिकामानवस्यच २२ इतितेमूर्तयोदेव्याव्याख्यानाव
सुधाधिप जगन्मातुश्चंडिकायाःकीर्तिताःकामधेनवाः २३ इदंरहस्यंपरमंनवाच्यंकस्य
२ चित्वया व्याख्यानंदिव्यमूर्तीनामभीष्टफलदायकं २४ देवीनांचततःसर्वंगुह्याद्गुह्यतर
परं इदंदेव्याश्चमाहात्म्यमाख्यातंतवपार्थिव २५ इतिश्रीमार्कंडेयपुराणेसावर्णिकेम
न्वंतरेदेवीमाहात्म्यरहस्यंसमाप्तम् ॐमार्कंडेयपुराणोक्तंदेवीमाहात्म्यमुत्तमं यःपठेच्छ्र
णपाङ्क्त्यानस्यमुक्तिर्नसंशयः। अज्ञानाद्विस्मृतेर्भ्रांत्यायन्न्यूनमधिकंकृतं विपरीतंतुतत्सर्वं
क्षमस्वपरमेश्वरी २ यदक्षरपदभ्रष्टंस्वरव्यंजनवर्जितं तत्सर्वंक्षमितादेवि प्रसीदपरमेश्वरि ३
यत्स्मृत्याचनामोक्त्यातपोयज्ञक्रियादिषु न्यूनंसंपूर्णतांयातिप्रसादात्परमेश्वरि ४
मंत्रहीनंक्रियाहीनंभक्तिहीनंसुरेश्वरि यस्तुतासिमयादेवितस्मात्वंवरदाभव ५ आवा

हनेचसूजांचावन्माक्राम्यजपंतथा विसर्जनंनजानामिचंडिकेत्वंक्षमस्वमे क्रामेश्वरीजगन्माताः सच्चिदानंद
विग्रहा गृहाणार्चामिमांसर्वप्रसीदकरुणानिधे गुह्यातिगुह्यगोप्त्रीत्वंगृहाणास्मत्कृतंजपं सिद्धिः
भवतुमेदेवित्वत्प्रसादान्महेश्वरि १ प्रातर्वत्समयेस्वच्छेदेविविजिपुरसुंदरि यथाशक्तिजपापूजा
गृहाणपरमेश्वरि २ समाप्तश्चायंसंपुर्णा ॥ अंगिरजोवाच मुनेः कथयसर्वज्ञभूयः किंचिदनुत्तमं
तत्त्वमेनस्यसर्वस्यपेनसिद्धिरवाप्यते ऋषिरुवाच भूयः शृणुमहाभागदेवीमाहात्म्यमुत्तमं विना
येनस्तवश्चायंनिर्जीवोनर्थदः न ३ दृष्ट्वाम्भुभविनिष्कितंदारुणंदेवकंटकं आजग्मुः परमानंदत्व
त्वाविलुमहेश्वराः ३ देवीस्तुतिंसमाधायगगनेनाल्लहासंयुताः आज्ञामादायदेवेशकर्त्तुर्ध्यानमादरात्
४ बद्धांजलिः पुटः साक्षात्तुष्टुवुः क्रमशः शिवा लोकानांचहितार्थायदेवीसहस्र ५
ब्रह्मासरस्वतीसहितः लक्ष्मीसहितः जनार्दनः सहितस्तथामहाकाल्या शंकरः स्तवमब्रवीत् ६ ब्रह्मो
वाच आज्ञापुराणममशासनातनीचतुर्भुजापुस्तकमक्षधारिणी वराभयाभ्यामनुशोभितांतां
नमामितांजाड्यजयविनाशिनीं ७ सरस्वतीत्वांमनुनौमिवाचंवाचाप्रसादस्यवराभिवृद्धं १
मुक्तामणिश्चानितकंवरांतांनाथैकलभ्यांपरमायविद्यां ८ श्रीकंठशक्तित्रयशोभमानांदशार
तूर्येणकृतानुरूपांपंचारवासांभुतम्भूरुहाणांसर्वत्वंनीतांप्रणमामिदेवीं ९ कलाद्यमंत्राम
पिकोटिनाशंविहारयंत्रांविमलैकशोभां स्वच्छावदातांस्फटिकानुरूपांसरस्वतीत्वांप्रणमा
मिमातः १ वाक्कायकार्यैः परमैः पवित्रैरमारमांगीवरदाभवद्भिः बीजैरमीभिः कपिबीजयुक्ता
ह्रीं युग्मगिरश्चैरितिमंत्रराजा ११ एकेनचैकेनचयुग्मकेनद्वाभ्यामथैकेनतथैवशेषैः
करांगुलिभिः परमोनमोयंनिहंतिपापानिचसाधकानां १२ रुठेनवैष्णवलयाचसहस्रपावि

स्त. धानपद्माचनयेवचावांश्रीकेनवताकिलश्रोभयाचन्यासेरमीभिः पजितोपिप्रंभ्व १२ द्वयेणालोमान्सक
१३ लार्थसिद्धिः स्तुविभुकैर्वा गपिसिद्धिमृच्छेत् मत्यायस्तपोणरमानिकासा: स्तयोपासनेनापि च वेद
सिद्धिः १४ न चावजे महिमानं वदीभिस्तत्तनिश्चस्थितेलोकमध्ये जानंति किं बुद्बुदा भूमितोयेजरा
वयं ब्रह्मरुद्रीशास्तुल्याः १५ नैवैवचावचयंसवदामोविशामपातयानथैवाचजीवा पद्मपामरुत्वादि
मा तमरुद्रशिरस्थपाभिसाद्यान्तां विसमुत्ताये १६ स्वांदविदामस्तवपाक्तियोगाद्रत्नीमतिनतत्वप्र
तयामरूपा मकामरूतवपाक्तेप्रभावाहानंदपुत्तास्तवसंनिवेशनात् १७ आत्मा मनस्त्व
त्वमेवासि देहस्त्वमेव वै चेंद्रियपंचतत्वा त्वमेव वेहिषयः समस्तुल्याः परावरेषापरतत्वमेव १८
रविश्वनेचंद्रमाश्चनेताराश्चनेभश्चनेमलंचनेतेजश्चनेवायुश्चनेप्राणश्चनेपानश्चनेव्यानश्चनेउदान
श्चनेसमानश्चनेनागश्चनेकूर्मश्चनेकृकलश्चनेदेवदत्तश्चनेधनंजयश्चनेभूतात्मा चनेज्ञानात्मा
चनेसर्वात्मा चनेममचित्तत्वय्येवविनिविष्टपतां १९ यदान चाउभूवनानि जीवानानन्न विसृष्ट
विपर्वतेषा: न चस्तुरोनापिसदाशिवश्च त्वमेव चासीदितिचाभविष्या २० कालस्त्वमेवासि
जगत्त्रयाणां स्वभाववीर्यादिकाच त्वमेव त्वमेवविश्वंपरमात्मशाक्तिर्नमामितेपादपीठंसरस्व
ति २१ त्वंवेदवाणीनिखिलश्चवेदस्तत्त्वप्रसूपाक्तिश्चतपाद्यशक्तिः त्वं ब्रह्मविद्याधिपरावरं
श्रीत्वं ब्रह्मशक्तिः शरणं प्रपद्ये सूक्तं वेदस्तवं सरस्वतिप्रातश्च मध्याह्नकाले च सायं पठंति
ये श्रद्धया सरि तास्ते भोगमोक्षसमालभंते २३ नते कुयोनिंनदरिद्रतां चाध्यात्मा
दितापं न च संलभंते नएव धन्याश्च नएव पूज्यास्तएव मान्या भवतीह तेषां २४ पदं पुराणं वि
रंजसुधामयं तत्त्वभूतंजगतां त्रयाणां तेषामुवंति प्रकटप्रभावात्त्वां सर्वयोनिं शरणं प्रपद्ये २५

ऋषिरुवाच स्तुतानया वेदवान्या सर्वसारस्वरूपया प्रसन्ना देवदेवी श्रीमहासर्वा सरस्वती २६
आविर्भूता महादेवी ब्रह्मतोषैककारिणी उवाच वचनं दिव्यं ब्रह्माणं वरप्रदायकं २७ श्रीदेव्यु
वाच स्तवेनानया वत्स ब्रह्मन् हर्षेण तोषसमन्विता स्तुतास्मि प्रियतां देव वरस्ते तोषकारक २८
ब्रह्मोवाच तदहं ये मनो देवी हृदं भवतु सर्वदा एष एव वरः साक्षात्तु तमाप्रीयते मया ३० स्व
त्स्तोत्रे चापि देवि त्वं निजतेजो दिव्यं विधीयतां येन कार्याणि सिद्ध्यन्ति साधकानां महात्मिनां
३१ श्रीदेव्युवाच सर्वदा ते मनो देवी कुलधर्मे तु स्थिते हृदं भवतु स्तोत्रं च प्रसादात्मे पर
नपः ३२ सर्वसिद्धिप्रदं चास्तु परमानन्ददायकं त्रिकाले च पठेद्यस्तु स्तोत्रं सप्तशतीति च
३३ मातृगामी सवित्ते यो नरकावासतत्परः ममैवाज्ञापरा हंत ब्रह्मत्वं ब्रह्मगतिं व्रजेत् ३४
ऋषिरुवाच एवमुक्त्वा वचो देवी तूष्णीमासीन्नृपोत्तम इति सप्तशती स्तोत्रं अथांजलि समाधा
यहृतिः प्रोवाच विश्वकृत्तु हरिरुवाच परां वैष्णवीं जगदादिभूतां महासलक्ष्मीं धरणीधराणां
अनादिमाद्यं परमां स्वरूपां त्वां विश्वयोनिं शरणं प्रपद्ये ३५ सकामनेकां विविधां सुकार्यां
कारिणीं सदसद्रूपिणीं च रूपामरूपां च शिवां शिवप्रदां त्वां विश्वयोनिं शरणं प्रपद्ये ३६
सर्वाश्रयां सर्वजगन्निवासां श्रीभद्रकालीमनादिदेवां शक्तिस्वरूपां च शिवस्वरूपां
त्वां विश्वयोनिं शरणं प्रपद्ये ३७ कामाक्षितां श्रीमधिकं सम्भूतां क्रोंरूपिणीं कपिबीजप्रभा
वां कन्नाष्टबीजां परमार्थसंज्ञां त्वां विश्वयोनिं शरणं प्रपद्ये ३८ वैश्वानरस्त्रीसहितेन दे
वीं श्री मंत्रराजेन विराजमानां सर्वार्थधात्रीं परमां पवित्रां त्वां विश्वयोनिं शरणं प्रपद्ये ३९ त्रि
कोणपंचास्रयुगप्रभावां षट्कोणमिश्राहृदि दशारयुक्तां अष्टारचक्रादिनिवासभूतां त्वां
विश्वयोनिं शरणं प्रपद्ये ४० पुनर्दशारस्थितनवप्रयुक्तां पंचारकोणांकितभूगृहां च

ल॰
२४

पंचाधिवासामपि यंत्ररूपां तां विश्वयोनिं प्रणतां प्रपद्ये ४१ संभाविता सर्वदेवाः समस्ताः सर्वस्वरूपा
मपि सर्वसेव्या सर्वान्तरस्या सर्वरूपा वरिष्ठा तां विश्वयोनिं प्रणतां प्रपद्ये ४२ सृष्टिस्थितिप्रलय
स्यैकबीजं यां सद्विधाय प्रजपन्ति ये वा त एव राजेन्द्र निकृष्टपापा दारिद्र्यदोषैस्सहसोमालभंते
४३ प्रसन्नपत्रं विधिना महेशि समस्ताः सकला परमं सुभाग्याः जपंति ये त्वां दिवि धार्यदाशी
त एव धन्याः कुलमार्गनिष्ठाः ४४ ज्ञानं तिके पापभावस्तु कूरूपा व्रलादि गीतेन मकि मामहेशि
केचिन्महान्तो निजधर्मलाभाज्ज्ञानंति ते देवपरस्तु धाम ४५ विधाय कुंडं विधिना स्थलं वा सो
मधित्तोम सफलं प्रकुर्वते त्वन्नोषणं ज्ञायते भाग्यमात्रं जेवासुदेवैरपि योगगम्य ४६ पुं
नाः स्तुनि प्रपतो विश्वसारा स्तोत्रैरुदारैः कुलयोगयुक्तः त एव धन्याः परमार्थभाजो भो
गस्य मोक्षस्य करे स्थिते षां ४७ ऋषिरुवाच मुनिभिः स्तुतया देवी महालक्ष्मी ददर्श सः
चतुर्भुजा चिनयनां महिषासुरघातिनी ४८ अस्य श्रीमन्महालक्ष्मीप्रसन्ना लक्ष्मीगौरवान् उवाच
स्मितपूर्वभाद्या नारायणमजं प्रभुं ४९ श्रीदेव्युवाच वरं वरय देवेशि नारायण सनातन त्व
यामया भिदा नव्यात वस्तुनाव शीकृता ५० नारायण उवाच माता परमकारुण्य महालक्ष्मि
क्षिवरप्रदे कुलाचारमतिर्मेस्तु दृढ तेस्तु तया शिवे ५१ नवस्रुक्तं च सफलं तवस्तु प्रीतिकार
णं श्रीदेव्युवाच वरमेनं महाभाग नारायण सनातन ५२ स्तोत्रमेतद्दिनाय स्तु पठेत्समशा
नीनरः सर्वाणि च महाघोरे नरके दारुणं किल ५३ लिप्यन्ते परमेशानं मम कोपविद्रुणितः
लक्ष्मीस्तोत्रं विना सम्पाती स्तोत्रं निषिध्यते ५४ ऋषिरुवाच एवमुक्त्वा वचो देवी तूष्णीं भ
वगता नृप मुनिमहालक्ष्मीस्तोत्रं ततोऽञ्जलिं समाधाय शिवो वाचमुदायुतः ५५ नु
ष्टा वचाभिर्दिव्याभिर्महाकालीमहेश्वरः वेदवाणीसमं तत्वाभिर्लोकानां हितकाम्यया

५६ शिवउवाच श्रीनामनिद्दा त्रिविधप्रभावा कालीकलामालिनी त्रिषवंध्या कपालाव॥
हागधसन्मुंडमालाविभूषा मृगचर्मशोभा ५७ सपुष्कमासांचशिवासनस्था विभीषणं
भीषयंतीसुवीरान् रक्तप्रियामांसमदा विघूर्णं कालीं प्रपद्ये शरणं व्रजामि ५८ सुघोर
बीजं चकपीश्वश्च चिंतामणिः कुब्जिकवीमहत्व विद्या च विद्या पुनको मत्तुं च कामः कः।
लाकामिनीकामराज ५९ वक्रेवधूमं च राजोयमोपेपेविश्वं पुनातीश्वरदेविवदे मंत्रेणचा
नेतसिध्यतिवासुत्तसिद्धयः सर्वजगन्निवासे ६० पंचास्तुम्भवत्रिकोणपुगसुनश्चापचा।
रयुतेनवहृ कलाप्रकोष्टकिलभ्य गृहचयत्रेश्वरेनेचपदाब्जवासे ६१ संसज्जयंत्रतवविश्व।
नायकेनिःपापिनःसहसासभवंति येसाधकास्तवमार्गानुसारिणः कुलानुदृष्ट्याःपरमाप
चित्राः ६२ नेसिद्धिमद्वंचपशेनानुगम्यान् तृणाववशीहित्यगृणान्मपामम स्तुमंत्रेणविधायचा
गत्यासादिवभक्तिस्तु भावयुक्तः ६३ नेकिंकरीकृत्यस्मृणानिदेवा शोधेजगन्नेयवविभूति
युक्ते वदामिनान्यनस्पृणोमि चान्यन्नमामिनानानविचिंतयामि स्मरामिनान्यनभजामि।
वोन्यध्यायामिनान्यतनचितर्कयामि गगमिनान्यत वपादमत्रात्वाविश्वयोनिशरणप्र
पद्ये ६६ येशानदैवंत्वमितासिदेवीनाराधयंतीरुचयेऽनुरूपः मधनमधटिमातिंत्तमदाने
ने मादृशीनंतेशरात्मनो ६७ ऋषिरुवाच इतिवाक्यंसमाकर्ण्यपरमामृतसंमितं प्रसन्नस्मला
कालीब्रियतामीप्सितोवरः इत्युवाच विशालाक्षीप्रभोरानंददायिनी प्रसन्नापरमाह्ला
दसयुताशिवभाषणात् ६८ श्रीदेव्युवाच ब्रियतामनसोभीष्टोवरोजगतिदुर्लभः दा
स्याभिरामिदानत्वस्त्वया वशीकृता ६९ श्रीशिवउवाच कुलाचारेणतेदेविम

स. ५ ने

निर्मलकदाचन शिथिलादेवदेवेशि सूक्तं च सफलं नव २० श्रीदेव्युवाच एवमस्त्विति चोक्त्वा हि
नित्यादेव्यः सनातनाः अन्तर्हिता मा सुपरमाएकस्मिन्ना स्थिता भवत् २१ अपतान्स्तुवतो देव्यान्सो
वाचवचनम् सन्तोषयन्ती च मुकुलीकानुग्रहं तत्पर गणेशधीति संयुक्ता ब्रह्मविष्णुम
हेश्वराः देवीसूक्तं पठं ध्यायं भविष्यति वराः धर्द २३ देवीसूक्तं विना देव्यायेच्च समश तान्त्र
श्रोष्यति च पठिष्यति तेषां शापः पदे पदे २४ देवीसूक्तं विना पाठो लयएषे वो दनं यथा
स्तोत्रोद्धारेण वर्जेन सर्गं स्तोत्रमभूदिदं देवा ऊचुः माता सम्प्रति स्तोत्रफलस्तु निमि
त्ता तु यासमाकं पंजीवानां विश्वासो जायते भृशं २६ ऋषिरुवाच इति वाक्यसमा
कर्ण्य ब्रह्मविष्णुशिवादितं फलस्तुतिमथोवाच स्तोत्रस्यास्य महामते २७ इति
श्रीरुद्रयामले तन्त्रे देवीमाहात्म्ये सप्तशतिकाया देवीसूक्तवर्णनं नाम समाप्तः ॥
ॐ नमः त्रिपुरसुन्दर्यै ॐ ऐं इसे व प्राणमनस्य दधती मध्ये ललाटप्रभा पूर्णीकान्तिमनु
रागोरिव शिरः स्यानन्दवती सर्वतः एषा सौ त्रिपुरा हृदि द्युति रिवोष्णांशोः सदा हस्थिता
छिन्द्यान्नः सहसा पदैस्त्रिभिरघं ज्योतिर्मयी वाङ्मयी १ यामात्रा त्रिपुरसीलतामनुलसन्त
तुस्थिति साधिनी वाग्वीजे पुण्यमेस्थितातव सदा तामन्तनौ नेवयं शक्तिः कुण्डलि
नीति विश्वजननी व्यापारबद्धोद्यमा ज्ञात्वेत्यं न पुनः स्पृशन्ति जननीगर्भे र्भकत्वं नराः २
दृष्ट्वा संभ्रमकारिवस्तुसहसा ऐ ऐ इति व्याहृतं येनाकूतवशाद पीह वरदं बिन्दुं विना
प्यक्षरं तस्यापि ध्रुवमेव देवि तरसा जाते तवानुग्रहे वाचः सूक्तिसुधारसद्रवमुचो
निर्यान्ति वक्त्राम्बुजात् ३ यन्नित्ये तव कामराजमपरं मन्त्राक्षरं निष्कलं तत्सारस्वत

भिन्नवैति विरलः कश्चिद्बुधस्त्रैङुवि आख्यातं प्रतिपर्वसत्यतपसो यत्कीर्तयंते द्विजाः प्रारंभे प्रण
वास्पदप्रणयिनीं नित्यां त्वां रतिस्फुटं ४ यत्सद्यो वचसां प्रवृत्तिकरणे दृष्टप्रभावं बुधैस्तार्तीयं तद
हं नमामि मनसा त्वद्बीजमिंदुप्रभं अस्त्वौर्वोपि सरस्वतीमनुगतो जाड्यांबुविच्छित्तये गोशब्दो
गिरि वर्तते सुनियतं योगं विना सिद्धिदः ५ एकैकं तव देवि बीजमनघं सव्यंजनाव्यंजनं कूट
स्थं यदि वा पृथक्क्रमगतं यद्वास्थितं व्युत्क्रमात् यं यं काममपेक्ष्य येन विधिना केनापि वा चिं
तितं जप्तं वा सफलीकरोति तरसा तं तं समस्तं नृणाम् ६ वामे पुस्तकधारिणीमभयदां सा
क्षस्रजं दक्षिणे भक्तेभ्यो वरदानपेशलकरां कर्पूरकुंदोज्ज्वलां उज्जृंभांबुजपत्रकांतिन
यनस्निग्धप्रभालोकिनीं ये त्वामंब न शीलयंति मनसा तेषां कवित्वं कुतः ७ ये त्वां पांडुर
पुंडरीकपटलस्पष्टाभिरामप्रभां सिंचंतीममृतद्रवैरिव शिरो ध्यायंति मूर्ध्नि स्थिताम् अश्रां
तं विकटस्फुटाक्षरपदा निर्याति वक्त्रांबुजात्तेषां भारति भारती सुरसरित्कल्लोललोलो
र्मिवत् ८ ये सिंदूरपरागपुंजपिहितां त्वत्तेजसा द्यामिमामुर्वीं चापि विलीनयावकरस
प्रस्तारमग्नामिव पश्यंति क्षणमप्यनन्यमनसस्तेषामनंगज्वरक्लांतास्त्रस्तकुरंगशाव
कदृशो वश्या भवंति स्फुटं ९ चंचत्कांचनकुंडलांगदधरामाबद्धकांचीस्रजं ये त्वां
चेतसि तद्गते क्षणमपि ध्यायंति कृत्वा स्थिरां तेषां वेश्मसु विभ्रमादहरहः स्फारीभव
त्यश्चिरं माद्यत्कुंजरकर्णतालतरलाः स्थैर्यं भजंते श्रियः १० आर्भट्या शशिखंडमंडित
जटाजूटां नृमुंडस्रजं बंधूकप्रसवारुणांबरधरां प्रेतासनाध्यासिनीं त्वां ध्यायंति चतु
र्भुजां त्रिनयनामापीनतुंगस्तनीं मध्ये निम्नवलित्रयांकिततनुं त्वद्रूपसंवित्तये ११ जातो

३ ले: प्यत्यपरिकुदेहितिभुजा सामान्यमात्रे कुले निःशेषावति च कवतिर्णदवीलक्ष्मा प्रजापोत्रतिः यद्दिशा
१६ धातृवृन्दवंदितपदं श्रीवत्सराजो भवद्दावित्वप्रवरणांबुजप्रणतिप्रसादोदयः १२ चंडित्वच्चर
णांबुजार्चनकृते विल्वीदलोल्लुंठनात् त्रुट्यत्कंठककोटिभिः परिचयं येषां न जग्मुः कराः ते दंड
कुशचक्रचापकुलिशश्रीवत्समत्स्यांकितैः जायंते पृथिवीभुजां कथमिमाभोजप्रभैः पाणि
भिः १३ विप्राद्यौ गणभुजो विशस्तदितरे क्षीराज्यमध्वासवैस्त्वां देवि त्रिपुरे परापरकलां संतर्प्य पूर
जाविधौ यां यां प्रार्थयते मनः स्थिरधियां तेषां तदेव ध्रुवं तां तां सिद्धिमवाप्नुवंति तरसा विघ्नैर
विघ्नीकृताः १४ शब्दानां जननीत्वमत्र भुवने वाग्वादिनीत्युच्यसे त्वत्तः केशववासवप्रभृतयो
प्याविर्भवंति ध्रुवं लीयंते खलु यत्र कल्पविरमे ब्रह्मादयस्तेप्यमी सा त्वं काचिदचिंत्यरूपमहि
मा शक्तिः परा गीयसे १५ देवानां त्रितयं त्रयी हुतभुजां शक्तित्रयं त्रिस्वराः त्रैलोक्यं त्रिपदी त्रिपु
ष्कराणि त्रिब्रह्म वर्णास्त्रयः यत्किंचिज्जगति त्रिधा नियमितं वस्तु त्रिवर्गात्मकं तत्सर्वं त्रि
पुरे त्वनाम भगवत्यन्वेति ते तत्त्वतः १६ लक्ष्मीराजकुले जया रणमुखे क्षेमंकरी मध्वनि क्र
व्यादद्विपसर्पभाजि शबरी कांतारदुर्गे गिरौ भूतप्रेतपिशाचजंबुकभये स्मृत्वा महाभै
रवी व्यामोहे त्रिपुरा तरंति विपदस्तारां च तोयप्लवे १७ माया कुंडलिनी क्रिया मधुमती का
ली कलामालिनी मातंगी विजया जया भगवती देवी शिवा शांभवी शक्तिः शंकरवल्लभा त्रि
नयनी वाग्वादिनी भैरवी ह्रींकारी त्रिपुरा परापरमयी माता कुमारीत्यसि १८ आईपल्लवि
तैः परस्परयुतैर्द्वित्रिक्रमाद्यक्षरैः काद्यैः क्षांतगतैः स्वरादिभिरथ क्षांतैश्च तैः सस्वरैः
नामानि त्रिपुरे भवंति खलु यान्यत्यंतगुह्यानि ते तेभ्यो भैरवपत्नि विंशतिसहस्रेभ्यः परे

भ्यो नमः १९ बोधव्या निपुणैर्बुधैः स्तुतिरियं कृत्वा मनस्तद्गतं भारत्यास्त्रिपुरेत्यनन्य
मनसो यत्राद्यवृत्ते स्फुटं एकद्वित्रिपदक्रमेण कथितं तत्पादसंख्याक्षरैर्मन्त्रोद्धा
रविधिर्विशेषसहितः सत्संप्रदायान्वितः २० सावद्यं निरवद्यमस्तु यदि वा किं वानया
चिंतया नूनं स्तोत्रमिदं पठिष्यति जनैः यस्यास्ति भक्तिस्त्वयि संचिन्त्यापि लघुत्वमात्मनि दृ
ढं संजायमानं हठात्त्वद्भक्त्या मुखरीकृतेन रचितं तस्मान्मयापि ध्रुवं २१ श्रीनंदेश्व
रवंकपद्मयोनय न निद्राहरणसात्विके वेदव्याकरणे वगारुनागिरानकोक्ति
मुक्तिप्रदम् वण्पाकपिपुरप्रवेशातगरक्षोभादिसिद्धाष्टकलब्धीजाप्यमिदं
करोत्तुसनतयोगीश्वरः सथ्नवम् २२ देविजनकामनिपार्वति सति त्रैलोक्य
मातः शिवे शर्वाणि त्रिपुरे मृडानि वरदे रुद्राणि कात्यायिनि भीमे भैरवि चंडि
शर्वस्तुवदे कालक्षये शूलिनि त्वत्पादप्रणतानन्यमनसः पर्याकुलापाहि
नः २३ आईमपल्लरजनीवरबिंदुनादमेकाक्षरयरम्लिंदकमुका वदंति
मंत्रक्रियेन भुवनत्रयमंकितं च सृष्टिस्थितिप्रलयकृत्तमचिंत्यरूप २४
इति श्रीलघ्वाचार्यविरचिते लघुस्तोत्रं समाप्तम् ॥ श्रीरामायनमः कृष्णायनमः
ॐ स्वस्ति श्रीगणेशायनमः इंद्र उवाच इंद्राक्षी नाम सा देवी दैवतैस्समुदाहृता गौ
री शाकंभरी देवी दुर्गा नाम्नेति विश्रुता। कात्यायिनी महादेवी चंद्रघंटा महा

त्रि

तथा गायत्री सा च सावित्री ब्रह्माणी ब्रह्मवादिनी २ नारायणी भद्रकाली रुद्राणी कृष्ण
उ.१ पिंगला अग्निज्वाला रौद्रमुखी कालरात्रिस्तपस्विनी ३ मेघस्वना सहस्राक्षी
१२ विष्णुमाया जलोदरी महोदरी मुक्तकेशी घोररूपा महाबला ४ श्रुतिः स्मृ
तिः धृतिर्मेधा विद्या लक्ष्मीः सरस्वती अनंता विजया पूर्णा मानस्तोकापराजि
नी ५ भवानी पार्वती देवी हैमवत्यंबिका शिवा एते नामपदैर्दिव्यैः स्तु
ता चक्रेण धीमता ६ प्रातरुत्थाय ये नित्यं पठंति श्रद्धयान्विताः धर्मार्थका
ममोक्षाणां भाजनं सततं जायते ७ य इदं पठते नित्यं स्तोत्रं सर्वपापैः प्रमु
च्यते अपुत्रो लभते पुत्रं वंध्यामुच्यति बंधनात् ८ संग्रामे जयमाप्नोति म
हामायाप्रसादतः आवर्तनसहस्रेण लभते जयमंगलं ९ धनधान्यसु
तान्प्राप्नुयात्सततं जपेन् बुद्धिमान् किंचित् सम्यक् सत्यमेव न संशयः १०
इति दुर्गास्तोत्रं समाप्तम् शुभं ॥ ॐ नमः शिवाय ॥
ॐ महिम्नः पारं ते परमविदुषो यद्यसदृशी स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि
गिरः अथावाच्यः सर्वः स्वमतिपरिणामावधि गृणन्ममाप्येष स्तोत्रे हर निरप
वादः परिकरः १ अतीतः पंथानं तव च महिमा वाङ्मनसयोरतद्व्यावृत्त्या यं चकि
तमभिधत्ते श्रुतिरपि स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः पदे त्वर्वाची
ने पतति न मनः कस्य न वचः २ मधुस्फीता वाचः परममृतं निर्मितवत

तं

स्तवब्रह्मन्किंवागपिसुरगुरोर्विस्मयपदं ममत्वेतांवाणींगुणकथनपुण्येनभवतः पुनामीत्य
र्थेस्मिन्पुरमथनबुद्धिर्व्यवसिता ३ तवैश्वर्यंयत्तज्जगदुदयरक्षाप्रलयकृत्त्रयीवस्तुव्यस्तंतिसृ
षुगुणभिन्नासुतनुषु अभव्यानामस्मिन्वरदरमणीयामरमणीं विहंतुंव्याक्रोशींविदधतइहै
केजडधियः ४ किमीहः किंकायः सखलुकिमुपायस्त्रिभुवनंकिमाधारोधातासृजतिकि
मुपादानइतिच अतर्क्यैश्वर्येत्वय्यनवसरदुःस्थोहतधियः कुतर्कोयंकांश्चिन्मुखरयति
मोहायजगतः ५ अजन्मानोलोकाः किमवयववंतोपिजगतामधिष्ठातारंकिंभवविधि
रनादृत्यभवति अनीशोवाकुर्याद्भुवनजननेकः परिकरोयतोमंदास्त्वांप्रत्यमरवरसं
शेरतइमे ६ त्रयीसांख्ययोगः पशुपतिमतंवैष्णवमितिप्रभिन्नेप्रस्थानेपरमिदमदः
पथ्यमितिच रुचीनांवैचित्र्यादृजुकुटिलनानापथजुषां नृणामेकोगम्यस्त्वम
सिपयसामर्णवइव ७ महोक्षःखट्वांगंपरशुरजिनंभस्मफणिनः कपालंचेतीयत्तव
वरदतंत्रोपकरणं सुरास्तांतामृद्धिंविदधतिभवद्भ्रूप्रणिहितां नहिस्वात्मारामंविषयमृगतृ
ष्णाभ्रमयति ८ ध्रुवंकश्चित्सर्वंसकलमपरस्त्वध्रुवमिदंपरोध्रौव्याध्रौव्येजगतिगदतिव्य
स्तविषये समस्तेप्येतस्मिन्पुरमथनतैर्विस्मितइवस्तुवंजिह्रेमित्वांनखलुननुधृ
ष्टामुखरता ९ तवैश्वर्यंयत्नाद्यदुपरिविरिंचोहरिरधः परिच्छेत्तुंयातावनलमनिल
स्कंधवपुषः ततोभक्तिश्रद्धाभरगुरुगृणद्भ्यांगिरिशयत्स्वयंतस्थेताभ्यांतवकिम
नुवृत्तिर्नफलति १० अयत्नादापाद्यत्रिभुवनमवैरव्यतिकरंदशास्योयद्बाहू

म-
१८ नभूतं रणकंडूपरवशान् शिरःपद्मश्रेणीरचितचरणांभोरुहबलेः स्थिरायास्त्वद्भक्तेस्त्रिपुरहरविस्फूर्जि
तमिदं ॥ ११ अमुष्य त्वत्सेवासमधिगतसारं भुजवनं बलात्कैलासेपि त्वदधिवसतो विक्रमयतः अल
भ्या पाताले प्यलसचलितांगुष्ठशिरसि प्रतिष्ठा त्वय्यासीद्ध्रुवमुपचितो मुह्यति खलः॥ १२ यदृद्धिं सु
त्राम्णो वरद परमोच्चैरपि सतीमधश्चक्रे बाणः परिजनविधेयस्त्रिभुवनं न तच्चित्रं तस्मिन्वरिव
सितरि त्वच्चरणयोर्न कस्याप्युन्नत्यै भवति शिरसस्त्वय्यवनतिः॥ १३ अकांडब्रह्मांडक्षयचकित
देवासुरकृपाविधेयस्यासीद्यस्त्रिनयनविषं संहृतवतः सकल्माषः कंठे तव न कुरुते न नि
श्रियमहो विकारोपि श्लाघ्यो भुवनभयभंगव्यसनिनः॥ १४ असिद्धार्था नैव क्वचिदपि सदेवा
सुरनरे निवर्तंते नित्यं जगति जयिनो यस्य विशिखाः स पश्यन्नीश त्वामितरसुरसाधारणम
भूत्स्मरः स्मर्तव्यात्मा नहि वशिषु पथ्यः परिभवः॥ १५ मही पादाघाताद्व्रजति सहसा संशयपदं
पदं विष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणं मुहुर्द्यौर्दौस्थ्यं यात्यनिभृतजटाताडिततटा जग
द्रक्षायै त्वं नटसि ननु वामैव विभुता॥ १६ वियद्व्यापी तारागणगुणितफेनोद्गमरुचिः प्र
वाहो वारां यः पृषतलघुदृष्टः शिरसि ते जगद्द्वीपाकारं जलधिवलयं तेन कृतमित्यनेनै
वोन्नेयं धृतमहिम दिव्यं तव वपुः॥ १७ रथः क्षोणी यंता शतधृतिरगेंद्रो धनुरथो रथांगे चं
द्रार्कौ रथचरणपाणिः शर इति दिधक्षोस्ते कोयं त्रिपुरतृणमाडंबरविधिर्विधेयैः क्रीड
त्यो न खलु परतंत्राः प्रभुधियः॥ १८ हरिस्ते साहस्रं कमलबलिमाधाय पदयोर्यदेकोने त
स्मिन्निजमुदहरन्नेत्रकमलं गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा त्रयाणां र
क्षायै त्रिपुरहर जागर्ति जगतां॥ १९ क्रतौ सुप्ते जाग्रत्त्वमसि फलयोगे क्रतुमतां क्व कर्म
प्रध्वस्तं फलति पुरुषाराधनमृते अतस्त्वां संप्रेक्ष्य क्रतुषु फलदानप्रतिभुवं

श्रुतौ श्रद्धां बद्ध्वा दृढपरिकरः कर्मसु जनः २० क्रियादक्षो दक्षः क्रतुपतिरधीशस्तनुभृतामृ
षीणामार्त्विज्यं शरणद सदस्याः सुरगणाः क्रतुभ्रंशस्त्वत्तः क्रतुषु फलदानव्यसनिनो ध्रुवं कर्तुः
श्रद्धाविधुरमभिचाराय हि मखाः २१ प्रजानाथं नाथ प्रसभमभिकं स्वां दुहितरं गतं रोहिद्भू
तां रिरमयिषुमृष्यस्य वपुषा धनुष्पाणेर्यातं दिवमपि सपत्राकृतममुं त्रसन्तं तेऽद्यापि त्यजति न मृ
गव्याधरभसः २२ स्वलावण्याशंसाधृतधनुषमह्नाय तृणवत् पुरः प्लुष्टं दृष्ट्वा पुरमथन पुष्पा
४ युधमपि यदि स्त्रैणं देवी यमनिरत देहार्धघटनादवैति त्वामद्धा बत वरद मुग्धा युवतयः २३ श्म
शानेष्वाक्रीडा स्मरहर पिशाचाः सहचराश्चिताभस्मालेपः स्रगपि नृकरोटीपरिकरः अ
मङ्गल्यं शीलं तव भवतु नामैवमखिलं तथापि स्मर्तॄणां वरद परमं मङ्गलमसि २४ मनः
प्रत्यक्चित्ते सविधमविधायात्तमरुतः प्रहृष्यद्रोमाणः प्रमदसलिलोत्सङ्गितदृशः यदालोक्या
ह्लादं ह्रद इव निमज्यामृतमये दधत्यन्तस्तत्त्वं किमपि यमिनस्तत्किल भवान् २५ त्वमर्क
स्त्वं सोमस्त्वमसि पवनस्त्वं हुतवहस्त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च परिच्छिन्ना
मेवं त्वयि परिणता बिभ्रतु गिरं न विद्मस्तत्तत्त्वं वयमिह तु यत्त्वं न भवसि २६ त्रयीं तिस्रो वृत्तीस्त्रिभु
वनमथो त्रीनपि सुरानकाराद्यैर्वर्णैस्त्रिभिरभिदधत्तीर्णविकृति तुरीयं ते धाम ध्वनिभिरवरुन्धा
नमणुभिः समस्तं व्यस्तं त्वां शरणद गृणात्योमिति पदं २७ भवः शर्वो रुद्रः पशुपतिरथोग्रः
सहमहांस्तथा भीमेशानाविति यदभिधानाष्टकमिदं अमुष्मिन्प्रत्येकं प्रविचरति देव
श्रुतिरपि प्रियायास्मै धाम्ने प्रणिहितनमस्योऽस्मि भवते २८ नमो नेदिष्ठाय प्रियदव द
विष्ठाय च नमो नमः क्षोदिष्ठाय स्मरहर महिष्ठाय च नमः नमो वर्षिष्ठाय त्रिनयन य
विष्ठाय च नमो नमः सर्वस्मै ते तदिदमिति सर्वाय च नमः २९ बहुलरजसे विश्वोत्प

म॰ नौभवाय नमोनमः प्रबलतमसे तत्संहारे हराय नमोनमः जनसुखकृते सत्वोद्रिक्तौ मृडाय नमोन
१९ मः प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमोनमः ३० कृशपरिणति चेतः क्लेशवश्यं क्व चेदं क्व च तव
गुणसीमोल्लंघिनी शश्वदृद्धिः इति चकितममंदीकृत्य मां भक्तिराधाद्वरद चरणयोस्ते वाक्यपुष्पो
पहारं ३१ असितगिरिसमं स्यात्कज्जलं सिंधुपात्रे सुरतरुवरशाखा लेखनी पत्रमुर्वी लिख
ति यदि गृहीत्वा शारदा सर्वकालं तदपि तव गुणानामीश पारं न याति ३२ असुरसुरमुनींद्रै
रर्चितेः इंदुमौलेर्ग्रथितगुणमहिम्नो निर्गुणस्येश्वरस्य सकलगणवरिष्ठः पुष्पदंताभिधानो
रुचिरमलघुवृत्तैः स्तोत्रमेतच्चकार ३३ अहरहरनवद्यं धूर्जटेः स्तोत्रमेतत् पठति परमभक्त्या
शुद्धचित्तः पुमान्यः स भवति शिवलोके रुद्रतुल्यस्तदात्र प्रचुरतरधनायुः पुत्रवान्कीर्तिमांश्च ३४
दीक्षा दानं तपस्तीर्थं होमयागादिकाः क्रियाः महिम्नस्तव पाठस्य कलां नार्हंति षोडशीं ३५ समा
प्तं यं समे स्तोत्रं सर्वमीश्वरवर्णितं अनुपम मनोहारि शिवमीशं गंधर्वभाषितं ३६ महेशान्नापरो
देवो महिम्नो नापरा स्तुतिः अघोरान्नापरो मंत्रो नास्ति तत्त्वं गुरोः परं ३७ कुसुमदशननामा
सर्वगंधर्वराजः शशिधरवरमौलेर्देवदेवस्य दासः स गुरुनिजमहिम्नो भ्रष्ट एवास्य रोषा
त्स्तवनमिदमकार्षीद्दिव्यदिव्यं महिम्नः ३८ सुरवरमुनिपूज्यं स्वर्गमोक्षैकहेतुं प
ठति यदि मनुष्यः प्रांजलिर्नान्यचेताः व्रजति शिवसमीपं किन्नरैः स्तूयमानः स्तवनमि
दममोघं पुष्पदंतप्रणीतं ३९ श्रीपुष्पदंतमुखपंकजनिर्गतेन स्तोत्रेण किल्बिषहरे
ण हरप्रियेण कंठस्थितेन पठितेन समाहितेन सुप्रीणितो भवति भूतपतिर्महे
शः ४० इति श्रीपुष्पदंताचार्यविरचितं महिम्नाख्यस्तोत्रं संपूर्णं ॥शुभं॥ ॥॥

ॐश्रीगणेशाय नमः ॐ शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं न चेदेवं देवो न खलु कुशलः स्प
दितुमपि अतस्त्वामाराध्यां हरिहरविरिंच्यादिभिरपि प्रणंतुं स्तोतुं वा कथमकृतपुण्यः प्र
भवति १ तनीयांसं पांसुं तव चरणपंकेरुहभवं विरिंचिः संचिन्वन्विरचयति लोकानविकलम् व
हत्येनं शौरिः कथमपि सहस्रेण शिरसां हरः संक्षुद्यैनं भजति भसितोद्धूलनविधिं २ अवि
द्यानामंतस्तिमिरमिहिरोद्दीपनकरी जडानां चैतन्यस्तवकमकरंदस्रुतिसिरा दरिद्राणां
चिंतामणिगुणनिका जन्मजलधौ निमग्नानां दंष्ट्रा मुररिपुवराहस्य भवती ३ त्वदन्यः
पाणिभ्यामभयवरदो दैवतगणस्त्वमेका नैवासि प्रकटितवराभीत्यभिनया भयात्त्रातुं दा
तुं फलमपि च वांछासमधिकं शरण्ये लोकानां तव हि चरणावेव निपुणौ ४ हरिस्त्वामारा
ध्य प्रणतजनसौभाग्यजननीं पुरा नारी भूत्वा पुररिपुमपि क्षोभमनयत् स्मरोपि त्वां नत्वा रति
नयनलेह्येन वपुषा मुनीनामप्यंतः प्रभवति हि मोहाय महतां ५ धनुः पौष्पं मौर्वी मधु
करमयी पंच विशिखा वसंतः सामंतो मलयमरुदायोधनरथः तथाप्येकः सर्वं हिमगिरि
सुते कामपि कृपामपांगात्ते लब्ध्वा जगदिदमनंगो विजयते ६ क्वणत्कांचीदामा करि
कलभकुंभस्तननता परिक्षीणा मध्ये परिणतशरच्चंद्रवदना धनुर्बाणान्पाशं सृणिमपि द
धाना करतलैः पुरस्तादास्तां नः पुरमथितुराहोपुरुषिका ७ सुधासिंधोर्मध्ये सुरविटपि
वाटीपरिवृते मणिद्वीपे नीपोपवनवति चिंतामणिगृहे शिवाकारे मंचे परम
शिवपर्यंकनिलयां भजंति त्वां धन्याः कतिचन चिदानंदलहरीम् ८ महीं मूलाधारे
कमपि मणिपूरे हुतवहं स्थितं स्वाधिष्ठाने हृदि मरुतमाकाशमुपरि मनोपि भ्रू

मध्येस कलमपिभित्वाकुलपथं सहस्रारे पद्मे सहरहसि पत्या विहरसि ९ सुधाधारासारैश्चरणक
सौ. मलान्तर्विगलितैः प्रपंचं सिंचन्ती पुनरपि रसाम्नायमहसा अवाप्य स्वां भूमिं भुजगनिभमध्यु
१० ष्टवलयं स्वमात्मानं कृत्वा स्वपिषि कुलकुंडे कुहरिणि १० चतुर्भिः श्रीकंठैः शिवयुवतिभि
पंचभिरपि प्रभिन्नाभिः शंभोर्नवभिरपि मूलप्रकृतिभिः त्रयश्चत्वारिंशद्वसुदलकलाश्र
त्रिवलयत्रिरेखाभिः सार्धं तव भवनकोणाः परिणताः ११ त्वदीयं सौंदर्यं तुहिनगिरिकन्ये तु
लयितुं कवींद्राः कल्पंते कथमपि विरिंचिप्रभृतयः यदालोकौत्सुक्यादमरललना या
न्ति मनसा तपोभिर्दुःप्रापामपि गिरिशसायुज्यपदवीं १२ नरं वर्षीयांसं नयनविरसं नर्म
सु जडं तवापांगालोके पतितमनुधावंति शतशः गलद्वेणीबंधाः कुचकलश
विस्रस्तसिचया हठात्त्रुट्यत्कांच्यो विगलितदुकूला युवतयः १३ क्षितौ षट्पंचाशद्द्वि
समधिकपंचाशदुदके हुताशे द्वाषष्टिश्चतुरधिकपंचाशदनिले दिवि द्विःषट्त्रि
शन्मनसि च चतुःषष्टिरिति ये मयूखास्तेषामप्युपरि तव पादांबुजयुगं १४ शरज्ज्यो
त्स्नाशुभ्रां शशियुतजटाजूटमकुटां वरत्रासत्राणस्फटिकगुटिकापुस्तककरां
सकृन्नत्वा न त्वा कथमपि सतां सन्निदधते मधुक्षीरद्राक्षामधुरिमधुरीणा भणितयः
१५ कवींद्राणां चेतःकमलवनबालातपरुचिं भजंते ये संतः कतिचिदरुणामेव
भवतीं विरिंचिप्रेयस्यास्तरुणतरशृंगारलहरीगभीराभिर्वाग्भिर्विदधति सतां र
ञ्जनममी १६ सवित्रीभिर्वाचां शशिमणिशिलाभंगरुचिभिः वशिन्याद्याभिस्त्वां स
ह जननि संचिंतयति यः स कर्ता काव्यानां भवति महतां भंगिसुभगैर्वचोभिर्वाग्देवी
वदनकमलामोदमधुरैः १७ तनुच्छायाभिस्ते तरुणतरणिश्रीसरणिभि
को

भिर्दिव्यं सर्वामुर्वीमरुणिमनिमग्नां स्मरति यः भवंत्यस्य त्रस्यद्वनहरिणशालीननयनाः सहोर्वश्या वश्याः क
ति कति न गीर्वाणगणिकाः १८ मुखं बिंदुं कृत्वा कुचयुगमधस्तस्य तदधो हरार्धं ध्यायेद्यो हरमहिषि ते म
न्मथकलां स सद्यः संक्षोभं नयति वनिता इत्यतिलघु त्रिलोकीमप्याशु भ्रमयति रवींदुस्तनयुगां १९ कि
रंतीमंगेभ्यः किरणनिकुरंबामृतरसं हृदि त्वामाधत्ते हिमगिरिशिलामूर्तिमिव यः स सर्पाणां दर्पं शम
यति शकुंताधिप इव ज्वरप्लुष्टान्दृष्ट्या सुखयति सुधाधारसिरया २० तडिल्लेखातन्वीं तपनशशिवैश्वा
नरमयीं निषण्णां षण्णामप्युपरि कमलानां तव कलां महापद्माटव्यां मृदितमलमायेन मनसा म
हांतः पश्यंतो दधति परमाह्लादलहरीं २१ भवानि त्वं दासे मयि वितर दृष्टिं सकरुणामिति स्तोतुं वांछ
न्कथयति भवानि त्वमिति यः तदैव त्वं तस्मै दिशसि निजसायुज्यपदवीं मुकुंदब्रह्मेंद्रस्फुटमकुटनीरा
जितपदां २२ त्वया हृत्वा वामं वपुरपरितृप्तेन मनसा शरीरार्धं शंभोरपरमपि शंके हृतमभूत् य
दादि त्वद्रूपं सकलमरुणाभं त्रिनयनं कुचाभ्यामानम्रं कुटिलशशिचूडालमकुटं २३ जगत्सू
ते धाता हरिरवति रुद्रः क्षपयते तिरस्कुर्वन्नेतत्स्वमपि वपुरीशस्तिरयते सदापूर्वः सर्वं तदिदमनु
गृह्णाति च शिवस्तवाज्ञामालंब्य क्षणचलितयोर्भ्रूलतिकयोः २४ त्रयाणां देवानां त्रिगुणजनितानां
त्रिनयनः भवेत्पूजा पूजा तव चरणयोर्या विरचिता तथा हि त्वत्पादोद्वहनमणिपीठस्य निकटे
स्थिता ह्येते शश्वन्मुकुलितकरोत्तंसमकुटाः २५ विरिंचिः पंचत्वं व्रजति हरिराप्नोति विरतिं
विनाशं कीनाशो भजति धनदो याति निधनं वितंद्री माहेंद्री विततिरपि संमीलति दृशां म
हासंहारेऽस्मिन्विलसति सति त्वत्पतिरसौ २६ जपो जल्पः शिल्पं सकलमपि मुद्राविरच
नं गतिः प्रादक्षिण्यभ्रमणमदनाद्याहुतिविधिः प्रणामः संवेशः सुखमखिलमात्मार्पण

सौ. णदृशासपर्यापर्यायस्तवभवतुयन्मेविलसितं २७ सुधामप्यास्वाद्यप्रतिभयजरामृत्युहरिणींविपद्यं
२१ तेविश्वेविधिशतमखाद्यादिविषदः करालंयत्क्ष्वेडंकवलितवतः कालकलनानशंभोस्तन्मूलं
तवजननिताटंकमहिमा २८ ददानेदीनेभ्यः श्रियमनिशमीशानसदृशीं ममंदसौंदर्यस्तवक
रमकरंदंविकिरती तवास्मिन्मंदारस्तवकसुभगेयातुचरणे निमज्जन्मज्जीवः करणचरणैःषट्
चरणतां २९ किरीटंवैरिंचंपरिहरपुरः कैटभभिदः कठोरेकोटीरेस्खलसिजहिजंभारिमु
कुटं प्रणम्रेष्वेतेषुप्रसभमभियातस्यभवनं भवस्याभ्युत्थानेतवपरिजनोक्तिर्विजयते ३० चतुःष
ष्ट्यातंत्रैःसकलमभिसंधायभुवनं स्थितस्तत्तत्सिद्धिप्रसवपरतंत्रैःपशुपतिः पुनस्त्वन्निर्बंधाद
खिलपुरुषार्थैकघटनास्वतंत्रंतेतंत्रंक्षितितलमवातीतरदिदं ३१ शिवःशक्तिःकामःक्षितिरथर
विःशीतकिरणः स्मरोहंसःशक्रस्तदनुचपरामारहरयः अमीहृल्लेखाभिस्तिसृभिरवसानेषुघ
टिता भजंतेवर्णास्तेतवजननिनामावयवतां ३२ स्मरंयोनिंलक्ष्मीं त्रितयमिदमादौतवमनो
र्निधायैकेनित्येनिरवधिमहाभोगरसिकाः भजंतित्वांचिंतामणिगुणनिबद्धाक्षवलयाः शिवा
ग्नौजुह्वंतःसुरभिघृतधाराहुतिशतैः ३३ शरीरंत्वंशंभोःशशिमिहिरवक्षोरुहयुगंतवात्मा
नंमन्येभगवतिभवात्मानमनघं अतःशेषःशेषीत्ययमुभयसाधारणतयास्थितःसंबंधो
वांसमरसपरानंदपरयोः ३४ मनस्त्वंव्योमत्वंमरुदसिमरुत्सारथिरसित्वमापस्त्वंभूमिस्त्व
यिपरिणतायांनहिपरं त्वमेवस्वात्मानंपरिणमयितुंविश्ववपुषा चिदानंदाकारंशि
वयुवतिभावेनबिभृषे ३५ तवाज्ञाचक्रस्थंतपनशशिकोटिद्युतिधरं परंशंभुंवंदेपरिमि
लितपार्श्वंपरचिता यमाराध्यभक्त्यारविशशिशुचीनामविषये निरालोकेलोके

निवसतिहिभालोकभवने ३६ विशुद्धौतेशुद्धस्फटिकविशदंव्योमजनकंशिवंसेवेदेवीमपिशि
वसमानव्यवसितां ययोःकांत्यायांत्याःशशिकिरणसारूप्यसरणिं विधूतांतर्ध्वांताविलसतिचकी
रीवजगती ३७ समुन्मीलत्संवित्कमलमकरंदैकरसिकंभजेहंसद्वंद्वंकिमपिमहतांमानस
चरं यदालापादष्टादशगुणितविद्यापरिणतिर्यदादत्तेदोषाद्गुणमखिलमद्भ्यःपयइव ३८
तडित्वंतंशक्त्यातिमिरपरिपंथिस्फुरणयास्फुरन्नानारत्नाभरणपरिणद्धेंद्रधनुषं तव
श्यामंमेघंकमपिमणिपूरैकशरणंनिषेवेवर्षंतंहरमिहिरतप्तंत्रिभुवनं ३९ तवस्वाधिष्ठाने
हुतवहमधिष्ठायनिरतंतमीडेसंवर्तंजननिमहतींतांचसमयां यदालोकेलोकान्दहतिम
हतिक्रोधकलिलेदयार्द्रादृष्टिस्तेशिशिरमुपचारंरचयति ४० तवाधारेमूलेसहसमय
यालास्यपरयानवात्मानंवंदेनवरसमहातांडवनटं उभाभ्यामेताभ्यामुदयविधिमुद्दि
श्यदयया सनाथाभ्यांजज्ञेजनकजननीमज्जगदिदं ४१ गतैर्माणिक्यत्वंगगनमणि
भिःसांद्रघटितं किरीटंतेहैमंहिमगिरिसुतेकीर्तयतिकः तमीडेपक्वाभस्फुरणशबलंच
द्रशकलंधनुःशौनासीरंकिमितिनविभातिधिषणं ४२ धुनोतुध्वांतंनस्तुलितदलितेंदी
वरवनंघनस्निग्धश्लक्ष्णंचिकुरनिकुरंबंतवशिवे यदीयंसौरभ्यंसहजमुपलब्धुंसुमन
सोवसंत्यस्मिन्मन्येवलमथनवाटीविटपिनां ४३ वहतीसिंदूरप्रबलकबरीभारति
मिरद्विषांवृंदैर्वंदीकृतमिवनवीनार्ककिरणं तनोतुक्षेमंनस्तववदनसौंदर्यलहरी
परीवाहस्रोतःसरणिरिवसीमंतसरणिः ४४ अरालैःस्वाभाव्यादलिकलभसश्री
भिरलकैःपरीतंतेवक्त्रंपरिहसतिपंकेरुहरुचिं दरस्मेरेयस्मिन्दशनरुचिकिंज
ल्करुचिरेसुगंधौमाद्यंतिस्मरदहनचक्षुर्मधुलिहः ४५ ललाटंलावण्यद्युतिवि

मलमाभाति तव यद्द्वितीयं तन्मन्ये मकुटघटितं चंद्रशकलं विपर्यासंन्यासादुभयमपि संभूय
मिलितं सुधालेपस्यूतिः परिणमति राकाहिमकरः ४६ भ्रुवौ भुग्ने किंचिद्भुवनभयभंगव
सनिनि त्वदीये नेत्राभ्यां मधुकररुचिभ्यां धृतगुणं धनुर्मन्ये सव्येतरकरगृहीतं रतिपतेः प्र
कोष्टे मुष्टौ च स्थगयति निगूढांतरमिदं ४७ अहः सूते सव्यं तव नयनमर्कात्मकतया त्रिया
मां वामं ते सृजति रजनीनायकतया तृतीया ते दृष्टिर्दरदलितहेमांबुजरुचिः समाधत्ते संध्यां दि
वसनिशयोरंतरचरीं ४८ विशाला कल्याणी स्फुटरुचिरयोध्या कुवलयैः कृपाधाराधारा
किमपि मधुराभोगवतिका अवंती दृष्टिस्ते बहुनगरविस्तारविजया ध्रुवं तत्तन्नामव्यव
हरणयोग्या विजयते ४९ कवीनां संदर्भस्तबकमकरंदैकरसिकं कटाक्षव्याक्षेपभ्र
मरकलभौ कर्णयुगलं अमुंचंतौ दृष्ट्वा तव नवरसास्वादतरलावसूयासंसर्गादलिक
नयनं किंचिदरुणं ५० शिवे शृंगारार्द्रा तदितरजने कुत्सनपरा सरोषा गंगायां गिरिशच
रिते विस्मयवती हराहिभ्यो भीता सरसिरुहसौभाग्यजननी सखीषु स्मेरा ते मयि जन
नि दृष्टिः सकरुणा ५१ गते कर्णाभ्यर्णं गरुत इव पक्ष्माणि दधती पुरां भेत्तुश्चित्तप्रश
मरसविद्रावणफले इमे नेत्रे गोत्राधरपतिकुलोत्तंसकलिके तवाकर्णाकृष्टस्म
रशरविलासं कलयतः ५२ विभक्तत्रैवर्ण्यं व्यतिकरितलीलांजनतया विभाति त्व
न्नेत्रत्रितयमिदमीशानदयिते पुनः स्रष्टुं देवान्द्रुहिणहरिरुद्रानुपरतान्रजः
सत्त्वं बिभ्रत्तम इति गुणानां त्रयमिदं ५३ पवित्रीकर्तुं नः पशुपतिपराधीनहृदये
दयामित्रैर्नेत्रैररुणधवलश्यामरुचिभिः नदः शोणो गंगा तपनतनयेति ध्रुव

मनुष्याणां तीर्थानामुपनयसि मं भेदमनघे ५४ तवापर्णे कर्णेजपनयनपैशुन्यचः
किता विलीयंते तोये नियतमनिमेषाः शफरिकाः इयं च श्रीर्बद्धच्छदपुटकवाटं कुवलयं जहाति प्रत्यूषे निशि च विघटय्य प्रविशति ५५ निमेषोन्मेषाभ्यां प्रल
यमुदयं याति जगती तवेत्याहुः संतो धरणिधरराजन्यतनये त्वदुन्मेषाज्जातं जगदिदम
शेषं प्रलयतः परित्रातुं शंके परिहृतनिमेषास्तव दृशः ५६ दृशा द्राघीयस्या दरदलि
तनीलोत्पलरुचा दवीयांसं दीनं स्नपय कृपया मामपि शिवे अनेनायं धन्यो भवति
न च ते हानिरियता वने वा हर्म्ये वा समकरनिपातो हिमकरः ५७ अरालं ते पालीयुगल
मगराजन्यतनये न केषामाधत्ते कुसुमशरकोदंडकुतुकं तिरश्चीनो यत्र श्रवणपथ
मुल्लंघ्य विलसन्नपांगव्यासंगो दिशति शरसंधानधिषणां ५८ स्फुरद्गंडाभोगप्रतिफ
लिततांटकयुगलं चतुश्चक्रं मन्ये तव मुखमिदं मन्मथरथं यमारुह्य द्रुह्यत्यवनिरथम
म केंदुचरणं महावीरो मारः प्रमथपतये सज्जितवते ५९ सरस्वत्याः सूक्तीरमृतलहरीकौश ल
लहरीः पिबंत्याः शर्वाणि श्रवणचुलुकाभ्यामविरलं चमत्कारश्लाघाचलितशिरसः कुं
डलगणो झणत्कारैस्तारैः प्रतिवचनमाचष्ट इव ते ६० असौ नासावंशस्तुहिनगिरिवं
शध्वजपटि त्वदीयो नेदीयः फलतु फलमस्माकमुचितं वहत्यंतर्मुक्ताः शिशिर
करनिःश्वासगलिताः समृद्ध्या यत्तासां बहिरपि च मुक्तामणिधरः ६१ प्रकृत्यारक्ता
यास्तव सुदति दंतच्छदरुचेर्वक्ष्ये सादृश्यं जनयतु फलं विद्रुमलता न बिंबं तद्बिंबप्र
तिफलनरागादरुणितं तुलामध्यारोढुं कथमिव विलज्जेत कलया ६२ स्मितज्योत्स्ना
जालं तव वदनचंद्रस्य पिबतां चकोराणामासीदतिरसतया चंचुजडिमा अः

सौं
२३

तते शीतांशोरमृतलहरीमम्लरुचयः पिबंति स्वछंदं निशि निशि भृशं कांजिकधिया ६३ अविश्रां
तं पत्युर्गुणगणकथाम्रेडनजपा जपापुष्पछाया तव जननि जिह्वा जयति सा यदग्रासीनायाः स्फ
टिकदृषदछछविमयी सरस्वत्या मूर्तिः परिणमति माणिक्यवपुषा ६४ रणे जित्वा दैत्यानप
हृतशिरस्त्रैः कवचिभिर्निवृत्तैश्चंडांशत्रिपुरहरनिर्माल्यविमुखैः विशाखेंद्रोपेंद्रैः शशिविश
दकर्पूरशकला विलीयंते मातस्तव वदनतांबूलकबला ६५ विपंच्या गायंती विविधमपदान
पशुपतेस्त्वयारब्धे वक्तुं चलितशिरसा साधुवचने तदीयैर्माधुर्यैरपलपिततंत्रीकलरवां नि
जां वीणां वाणी निचुलयति चोलेन निभृतं ६६ कराग्रेण स्पृष्टं तुहिनगिरिणा वत्सलतया
गिरीशेनोदस्तं मुहुरधरपानाकुलतया करग्राह्यं शंभोर्मुखमुकुरवृंतं गिरिसुते कथंका
रं ब्रूमस्तव चिबुकमौपम्यरहितं ६७ भुजाश्लेषान्नित्यं पुरदमयितुः कंटकवती तव ग्रीवा ध
त्ते मुखकमलनालश्रियमियं स्वतः श्वेता कालागुरुबहुलजंबालमलिना मृणाली
लालित्यं वहति यदधो हारलतिका गले रेखास्तिस्रो गतिगमकगीतैकनिपुणे विवाह
व्यानद्धत्रिगुणगणसंख्याप्रतिभुवः विराजंते नानाविधमधुररागाकरभुवां त्रया
णां ग्रामाणां स्थितिनियमसीमान इव ते ६९ मृणालीमृद्वीनां तव भुजलतानां चतसृ
णां चतुर्भिः सौंदर्यं सरसिजभवः स्तौति वदनैः नखेभ्यः संत्रस्यन्प्रथममथनादंधक
रिपोश्चतुर्णां वक्त्राणां सममभयहस्तार्पणधिया ७० नखानामुद्योतैर्नवनलिनरागं
विहसतां कराणां ते कांतिं कथय कथयामः कथमुमे कदाचिद्वा साम्यं व्रजतु विपि
याद तत कमलं यदि क्रीडल्लक्ष्मीचरणतललाक्षारसचणं ७१ समं देवि स्कंदद्विपव
दनपीतं स्तनयुगं तवेदं नः खेदं हरतु सततं प्रस्नुतमुखं यदालोक्याशंकाकुलि

तहृदयोहासजनकः स्वकुंभौहेरंबःपरिमृशतिहस्तेनजटिति ७२ अमूंतेवक्षोजावमृत
रसमाणिक्यकुतुपौनसंदेहस्पंदोनगपतिपताकेमनसिनः पिबंतौतौयस्मादविदितवधू
संगमरसौकुमारावद्यापिद्विरदवदनक्रौंचदलनौ ७३ वहत्यंवस्तंबेरमदनुजकुंभप्रकृतिभिः
समारब्धांमुक्तामणिभिरमलांहारलतिकां कुचाभोगोबिंबाधररुचिभिरंतःशबलितांप्रता
पव्यामिश्रांपुरदमयितुःकीर्तिमिवते ७४ कुचौसद्यःस्विद्यत्तटघटितकूर्पासभिदुरौकष
तौदोर्मूलेकनककलशाभौकलयता तवत्रातुंभंगादलमितिवलग्नंतनुभुवात्रिधा
नद्धंदेवित्रिवलिलवलीवल्लिभिरिव ७५ तवस्तन्यंमन्येधरणिधरकन्येहृदयतःपयःपारा
वारःपरिवहतिसारस्वतइव दयावत्यादत्तंद्रविडशिशुरास्वाद्यतवयत्कवीनांप्रौढानाम
जनिकमनीयःकवयिता ७६ हरक्रोधज्वालावलिभिरवलीढेनवपुषागभीरेतेना
भीसरसिकृतसंगोमनसिजः समुत्तस्थौतस्मादचलतनयेधूमलतिकाजनस्तांजानी
तेजननितवरोमावलिरिति ७७ यदेतत्कालिंदीतनुतरतरंगाकृतिशिवेकृशेमध्येकिंचि
न्मध्येभवतितवतद्भातिसुधियां विमर्दादन्योन्यंकुचकलशयोरंतरगतं तनूभूतंव्योम ल
प्रविशदिवनाभींकुहरिणीं ७८ स्थिरोगंगावर्तःस्तनमुकुलरोमावलिलताजलावाल
कुंडंकुसुमशरतेजोहुतभुजः रतेर्लीलागारंकिमपितवनाभिर्गिरिसुतेबिलद्वार
सिद्धेर्गिरिशनयनानांविजयते ७९ निसर्गक्षीणस्यस्तनतटभरेणक्लमजुषोनमन्मू
र्तेर्नारीभौवलिशनकैस्त्रुट्यतइव चिरंतेमध्यस्यत्रुटिततटिनीतीरतरुणीसमाव।
स्थास्थेम्नोभवतुकुशलंशैलतनये ८० गुरुत्वंविस्तारंक्षितिधरपतिःपार्वतिनि।

ज्जानितंबादाछिद्यत्वयिहरणरूपेणनिदधे अतस्तेविस्तीर्णोगुरुरयमशेषांवसुमतींनितंबप्रा
सौ० ग्भारःस्थगयतिलघुत्वंनयतिच ८१ करींद्राणांशुंडाःकनककदलीकांडपटलीमुभाभ्या
२४ मूरुभ्यामुभयमपिनिर्जित्यभवती सुवृत्ताभ्यांपत्युःप्रणतिकठिनाभ्यांगिरिसुतेविधिज्ञे
जानुभ्यांविबुधकरिकुंभद्वयमसि ८२ पराजेतुंरुद्रंद्विगुणशरगर्भौगिरिसुतेनिषंगौजंघे
तेविषमविशिखोबाढमकृत यदग्रेदृश्यंतेदशशरफलापादयुगलीनखाग्रच्छद्मानः
सुरमुकुटशाणैकनिशिता ८३ श्रुतीनांमूर्धानोदधतितवयौशेखरतयाममाप्येतौ
ध्ये मातःशिरसिदययाधेहिचरणौ ययोःपाद्यंपाथःपशुपतिजटाजूटतटिनीययोर्ला
क्षालक्ष्मीररुणहरचूडामणिरुचिः ८४ हिमानीहंतव्यंहिमगिरिनिवासैकचतुरौ निशायां
निद्राणंनिशिचपरभागेचविशदौ परंलक्ष्मीपात्रंश्रियमपिसृजंतौप्रणयिनांसरोजंत्व
त्पादौजननिजयतश्चित्रमिहकिं ८५ नमोवाकंब्रूमोनयनरमणीयायपदयोस्त
वास्मैद्वंद्वायस्फुटरुचिरसालक्तकवते असूयत्यत्यंतंयदभिहननायस्पृहयतेपशूनामी
यत्य शानःप्रमदवनकंकेलितरवे ८६ मृषाकृत्वागोत्रस्खलितमथवैलक्ष्यनमितंलला
टेभर्तारंचरणकमलेताडयतिते चिरादंतःशल्यंदहनकृतमुन्मीलितवता तुलाको
टिक्वाणैःकिलिकिलितमीशानरिपुणा ८७ पदंतेकीर्तीनांप्रपदमपदंदेविविपदां
कथंनीतंसद्भिःकठिनकमठीकर्परतुलां कथंवाबाहुभ्यामुपयमनकालेपुरभिदा
यदादायन्यस्तंदृषदिदयमानेनमनसा ८८ नखैर्नाकस्त्रीणांकरकमलसंकोच
शशिभिस्तरूणांदिव्यानांहसतइवतेचंडिचरणौ फलानिस्वःस्थेभ्यःकिसलय

करांग्रेणाददतां दरिद्रेभ्यो भद्रां श्रियमनिशमह्नाय ददतौ ८९ कदाकाले मातः कथय कलि
तालक्तकरसं पिबेयं विद्यार्थी तव चरणनिर्णेजनजलं प्रकृत्या मूकानामपि च कविता:
कारणतया यदा धत्ते वाणीमुखकमलताम्बूलरसतां ९० पदन्यासक्रीडापरिचयमि
वारब्धुमनसः स्खलन्तस्ते खेलं भवनकलहंसा न जहति अतस्तेषां शिक्षां सुभगमणिम
ञ्जीररणितच्छलादाचक्षाणं चरणकमलं चारुचरिते ९१ अरालाकेशेषु प्रकृतिस
रलामन्दहसिते शिरीषाभा चित्ते दृषदिव कठोरा कुचतटे भृशं मध्ये तन्वी पृथुरुरसि
जारोहविषये जगत्त्रातुं शंभोर्जयति करुणा काचिदरुणा ९२ समानीतः पद्भ्यां मणि
मुकुरतामंबरमणिर्भयादन्तःस्तिमितकिरणश्रेणिमसृणः दधाति त्वद्वक्त्रप्रति
फलनमश्रान्तविकसन्निरातंकश्चन्द्रान्निजहृदयपंकेरुहमिव ९३ पुरारातेरन्तःपु
रमसि ततस्त्वच्चरणयोः सपर्यामर्यादा तरलकरणानामसुलभा तथाप्येते नीताः
शतमखमुखाः सिद्धिमतुलां तव द्वारोपान्तस्थितिभिरणिमाद्याभिरमराः ९४
गतास्ते मञ्चत्वं द्रुहिणहरिरुद्रेश्वरभृतः शिवः स्वच्छच्छायाघटितकपटप्रच्छदपटः
त्वदीयानां भासां प्रतिफलनरागारुणतया शरीरी शृंगारो रस इव दृशां दोग्धि कुतुकं ९५
कलंकः कस्तूरी रजनिकरबिंबं जलमयं कलाभिः कर्पूरैर्मरकतकरंडं निबि
डितं अतस्त्वद्भोगेन प्रतिदिनमिदं रिक्तकुहरं विधिर्भूयो भूयो निबिडयति नू
नं तव कृते ९६ एवदेवोऽद्भुताभिर्घृणिभिररुणिमायाभिरभिनो निषेवे नित्यता

सौं- महमितिसदाभावयतियः किमाश्चर्यंतस्यत्रिनयनसमृद्धिंतृणयतोमहासंवर्ताग्निर्विरच
२५ यतिनीराजनविधिं ९७ समुद्भूतस्थूलस्तनभरमुरश्चारुहसितंकटाक्षेकंदर्पःकुसु
मितकदंबद्युतिवपुः हरस्यत्वद्भ्रांतिंमनसिजनयंतःसमतुलाभवत्यायेभक्ताःप
रिणतिरमीषामियमुमे ९८ कलत्रंवैधात्रंकतिकतिभजंतेनकवयःश्रियोदे
व्याःकोवानभवतिपतिःकैरपिधनैः महादेवंहित्वातवसतिसतीनामचरमेकु
चाभ्यामासंगःकुरवकतरोरप्यसुलभः ९९ गिरामाहुर्देवींद्रुहिणगृहिणीमा
गमविदोहरेःपत्नीपद्मांहरसहचरीमद्रितनयां तुरीयाकापित्वंदुरधिगमनिः
सीममहिमामहामायेविश्वंभ्रमयसिपरब्रह्ममहिषि १०० स्वरस्वत्यालक्ष्म्या
विधिहरिसपत्नोविहरतेरतेःपातिव्रत्यंशिथिलयतिरम्येणवपुषा चिरंजीवन्ने
वक्षपितपशुपाशव्यतिकरःपरब्रह्माभिख्यंरसयतिरसंत्वद्भजनवान् १०१ निधेनि
त्यस्मेरेनिरवधिगुणेनीतिनिपुणेनिराघाटज्ञानेनियमपरचित्तैकनिलये नि
यत्यानिर्मुक्तेनिखिलनिगमांतस्तुतिपदेनिरातंकेनित्येनिगमयममापिस्तुति
मिमां १०२ प्रदीपज्वालाभिर्दिवसकरनीराजनविधिःसुधासूतेश्चंद्रोपलजललवै
रर्घ्यरचना स्वकीयैरंभोभिःसलिलनिधिसौहित्यकरणं त्वदीयाभिर्वाग्भिस्तवज
ननिवाचांस्तुतिरियं १०३ इतिश्रीशंकराचार्यविरचितसौंदर्यलहरीस्तोत्रंसंपू ल
र्णं ॥ श्रीः ॥ ॥ राम ॥ ॥ शुभं ॥

ॐश्रीरामायनमः ॐअस्यश्रीरामहृदयस्तोत्रमंत्रस्य श्रीरामचंद्रऋषिः अनुष्टुप्छंदः श्रीअखंडपुरु
षोदेवता सर्वकामनासिद्ध्यर्थेजपेविनियोगः श्रीपार्वत्युवाच यदिस्मजानासिकृतोविलापःसीतादि
तेनेनकृतःपरेण जानासिनैवयदिकेनसेव्यः समोपिसर्वैरिहजीवजातैः । नाहंनवाग्निः सवितु
र्यथाभवेत्प्रकाशस्त्वप्यव्यभिचारतःक्वचित् ज्ञानंतथाज्ञानमिदंद्वयंहरौरामेकथंस्यात्सनिस्पृह १
विग्रहे २ श्रीमहादेवउवाच अतःकथयिष्यामिरहस्यमपिदुर्लभं सीतारामहनूमत्संवाद
मोक्षसाधनं ३ पुरारामायणेरामोरावणंदेवकंटकं हत्वारणेरणश्लाघीसपुत्रबलवाहनं ४
सीतयासहसुग्रीवलक्ष्मणाभ्यांसमन्वितः अयोध्यामगमद्रामोहनुमत्प्रमुखैर्वृतः अभिषिक्तः
परिवृतोवसिष्ठाद्यैर्महात्मभिः सिंहासनेसमासीनः सूर्यकोटिसमप्रभः ६ दृष्ट्वातदाहनूमंतं
प्रांजलिंपुरतस्थितं कृतकार्यंनिराकांक्षंज्ञानापेक्षंमहामतिं ७ रामःसीतामुवाचेदंब्रूहि
तत्वंहनूमते निष्कल्मषोयंज्ञानस्यपात्रंनोनित्यभक्तिमान् ८ तथेतिजानकीप्राहतत्वं
रामस्यनिश्चितं हनुमतेप्रपन्नायसीतालोकविमोहिनी ९ सीताउवाच रामंविद्धिपरंब्रह्म
सच्चिदानंदमद्वयं सर्वोपाधिविनिर्मुक्तंसत्तामात्रमगोचरं १० आनंदंनिर्मलंशांतंनिर्वि
कारंनिरंजनं सर्वव्यापिनमात्मानंस्वप्रकाशमकल्मषं ११ मांविद्धिमूलप्रकृतिंसर्गस्थित्यं
तकारिणीं तस्यसंनिधिमात्रेणसृजामीदमतंद्रिता १२ तत्सांनिध्यान्मयासृष्टंतस्मिन्नारोप्यते
बुधैः अयोध्यानगरेजन्मरघुवंशेतिनिर्मले १३ विश्वामित्रसहायत्वंमखसंरक्षणं
ततः अहल्याशापशमनंचापभंगोमहेशितुः १४ मत्पाणिग्रहणंपश्चाद्भार्गवस्यमद
क्षयः अयोध्यानगरेवासोमयाद्वादशवार्षिकं १५ दंडकारण्यगमनंविराधवधएवच

नौ

णांमारीचमरणंमायासीताहृतिस्तथा १६ जटायुषोमोक्षलाभःकबंधस्यतथैवच शबर्याःपूज
रा॰ नंपश्चात्सुग्रीवेणसमागमः १७ वालिनश्चवधःपश्चात्सीतान्वेषणमेवच सेतुबंधश्चजलधौ
म॰ लंकायाश्चनिरोधनं १८ रावणस्यवधोयुद्धेसपुत्रस्यदुरात्मनः विभीषणेराज्यदानंपुष्पके
२६ णमयासह १९ अयोध्यागमनंपश्चाद्राज्येरामाभिषेचनं एवमादीनिकर्माणिमयैवच
२ रितान्यपि आरोपयंतिरामेस्मिन्निर्विकारेखिलात्मनि रामोनगच्छतिनतिष्ठतिनानुशो
चेन्नकांक्षतित्यजतिनकरोतिकिंचित्समोराजीवलोचनः आनंदमूर्तिरचलः[illegible]
रा [illegible]विग्रहः परिणामहीनोमायागुणाननुगतोहितथाविभाति २१ श्रीमहादेवउवाच ततोरा
मःस्वयंप्राहहनूमंतमुपस्थितं शृणुतत्वंप्रवक्ष्यामिह्यात्मनात्मपरात्मनां २२ आकाश
स्ययथाभेदस्त्रिविधोदृश्यतेमहान् जलाशयेमहाकाशस्तदवछिन्नएवहि २३ प्रति
बिंबाख्यमपरंदृश्यतेत्रिविधंनभः बुद्ध्यवछिन्नचैतन्यमेकंपूर्णंततःपरं २४ आभासस्त्वप
रंबिंबभूतमेकंत्रिधाचितिः साभासबुद्धेःकर्तृत्वमवछिन्नेविकारिणि २५ साक्षिण्यारोप्यते
भ्रांत्याजीवत्वंचतथाबुधैः आभासस्तुमृषाबुद्धिरविद्याकार्यमुच्यते २६ अविछिन्नंतुतद्ब्रह्म
विछेदस्तुविकल्पतः अविछिन्नस्यपूर्णेनएकत्वंप्रतिपद्यते २७ तत्वमस्यादिवाक्यैश्चसाभा
सस्याहमस्तथा ऐक्यज्ञानंयदोत्पन्नंमहावाक्येनचात्मनः २८ तदाविद्यास्वकार्यैश्च
नश्यत्येवनसंशयः एतद्विज्ञायमद्भक्तोमद्भावायोपपद्यते २९ मद्भक्तिविमुखानां
हिशास्त्रगर्तेषुमुह्यतां नज्ञानंनचमोक्षःस्यात्तेषांजन्मशतैरपि ३० इदंरहस्यंहृद

यंममात्मनोमयैवसाक्षात्कथितंतवानघ मद्भक्तिहीनायशठायनत्वयादातव्यमैंद्रा
दपिराज्यतोधिकं ३१ श्रीमहादेवउवाच एतन्निगदितंदेविश्रीरामहृदयंमया अति
गुह्यतमंहृद्यंपवित्रंपापशोधनं ३२ साक्षाद्रामेणकथितंसर्ववेदांतसंग्रहं यः
पठेत्सततंभक्त्यासमुक्तोनात्रसंशयः ३३ ब्रह्महत्यादिपापानिबहुजन्मा
र्जितान्यपि नश्यंत्येवनसंदेहोरामस्यवचनंयथा ३४ जातिभ्रष्टोतिपा
पीपरधनपरदारेषुनित्योद्यतोवास्तेयीब्रह्मघ्नोमातापितृवधनिरतोयो
गिवृंदापकारी यःसंपूज्याभिरामंपठतिचहृदयंरामचंद्रस्यभक्त्यायोगी
द्रैरप्यलभ्यंपदमपिलभतेसर्वदेवैःसपूज्यः ३५ इतिश्रीअध्यात्मरा
मायणेउमामहेश्वरसंवादेरामहृदयंसमाप्तं ॥ रामायनमः ॥ ॥ ॥
ॐनमोभवान्यैनमः ॐब्रह्मकुलकुंडलपनंतीचक्रमध्येस्फुरंती मधुरसमधुपायिवंतीकाल
कोमुद्रायंती दुरितमपहरंतीसाधकांतोषयंती जयतिजगदेवीश्रीसुंदरीक्रीडयं
ती चतुर्भुजामेकवक्त्रांहेमांडुवदनप्रभाम् खड्गशक्तिधरांदेवींवरदाभयपाणिकाम्
प्रेतस्थामप्यरोद्रीभुजंगेनोपवीतिनीम् भवानींकालसंहारखड्गमुद्राविभू
षिताम् जगत्स्थितिकरींब्रह्मविष्णुरुद्रादिभिःस्तुतैः स्तुतांनापरमेशानींनोमिच
विघ्नहारिणीम् ॐनमोभवान्यै कैलासशिखरेरम्येदेवदेवंमहेश्वरं ध्यानोप
रतमासीनंप्रसन्नमुखपंकजम् सुरासुरशिरोरत्नरंजितांघ्रियुगांबुजम् प्र

णम्य शिरसा नन्दी बद्धांजलिरभाषत श्रीनन्दिकेश्वर उवाच देवदेव जगन्नाथ सर्वसंप्रयोत्तिमक्ता
भै त्मम रहस्यमेकमिच्छामि प्रष्टुं त्वां भक्तवत्सल देवता या त्वया कस्मात् स्तोत्रमेतद्दिवानिश
२७ म् पद्यते विरतं नाथ त्वत्तः किमपरः परः इति पृष्टस्तदा देवो नन्दिकेन जगद्गुरुः प्रोवाच भग
वाने कोविकसन्नेत्रपंकजः श्रीभगवानुवाच साधु साधु गणश्रेष्ठ पृष्टवानसि मां च यत्
स्कन्दस्यापि च यद्गोप्यं रहस्यं कथयामि तत् पुरा कल्पक्षये लोकान् सिसृक्षुर्मूढचेतनः
गुणत्रयमयी शक्तिर्मूलप्रकृतिसंज्ञिता तस्यामहं समुत्पन्नस्तत्त्वैस्तैर्महदादिभिः चेत
नेति ततः शक्तिर्मां काप्यालिंग्य तस्थुषी हेतुः संकल्पजालस्य मनोधिष्ठायिनी शुभा
इच्छेति परमा शक्तिरुन्मीलनतः परम् ततो वागिति विख्याता शक्तिः शब्दमयी पुरा
प्रादुरासीज्जगन्माता वेदमाता सरस्वती ब्राह्मी च वैष्णवी रौद्री कौमारी पार्वती शिवा
सिद्धिदा बुद्धिदा शान्ता सर्वमंगलदायिनी तयैतत्सृज्यते विश्वमनाधारं च धार्यते तयै
तल्लयते सर्वं तस्यामेव प्रलीयते अर्चिता प्रणता ध्याता सर्वभावविनिश्चितैः आ
राधिता स्तुता सैव सर्वसिद्धिप्रदायिनी तस्याश्चानुग्रहाद्देवतामेव स्तुतवानहम् स
हस्रैर्नामभिर्दिव्यैस्त्रैलोक्यप्राणिपूजितैः स्तवेनानेन संतुष्टा मामिवप्रविवेशासा त
दारभ्य मया प्राप्तमैश्वर्यं पदमुत्तमम् तत्प्रभावान्मया सृष्टं जगदेतच्चराचरम् स
सुरासुरगन्धर्वयक्षराक्षसमानवम् सपन्नगं ससमुद्रं सशैलवनकाननम्
सग्रहर्क्षराशिनक्षत्रं पंचभूतगुणान्वितम् नन्दिन्नामसहस्रेणास्तवेनानेन स
र्वदा स्तवे परां परां शक्तिं ममानुग्रहकारिणीम् इत्युक्तोपरतं देवं चराचर

गुरुंविभुम् प्रणम्यशिरसानन्दीप्रोवाचपरमेश्वरम् श्रीनन्दिकेश्वरउवाच। भगवन्देवदेवे
श लोकनाथजगत्पते भक्तोस्मितवदासोस्मिप्रसादः क्रियतांमयि देव्याःस्तवमिमंपु
ण्यंदुर्लभंयत्सुरैरपि श्रोतुमिच्छाम्यहंदेवप्रभावामपिचास्यतु श्रीभगवानुवाच शृ
णुनन्दिन्महाभागस्तवराजमिमंशुभम् सहस्रैर्नामभिर्दिव्यैःसिद्धिदंसुखमोक्षदम्
शुचिभिःप्रातरुत्थायपठितव्यसमाहितैस्त्रिकालंश्रद्धयायुक्तैर्नातःपरतरस्तवः
अस्यश्रीभवानीनामसहस्रस्तवराजस्य श्रीमहादेवऋषिः अनुष्टुप्छन्दः श्रीदे
वीप्रीत्यर्थेजपेपाठेविनियोगः अथध्यानम् ओंअर्धेन्दुमौलिममलाममराभिवन्द्या
मंभोजपाशसृणिरक्तकपालहस्ताम् रक्तांगरागरशनाभरणांत्रिनेत्रांध्याये
च्छिवस्यवनितांमदविह्वलांगीम् श्रीईश्वरउवाच ओंमहाविद्याजगन्मातामहाल
क्ष्मीःशिवप्रिया विष्णुमायाशुभाशान्तासिद्धासिद्धसरस्वती क्षमाकान्तिःप्रभाज्यो
त्स्नापार्वतीसर्वमंगला हिंगुलाचण्डिकादान्तापद्मालक्ष्मीर्हरिप्रिया त्रिपुरानन्दिनी
नन्दासुनन्दासुरवन्दिता यज्ञविद्यामहामायावेदमातासुधाधृतिः प्रीतिःप्र
थाप्रसिद्धाचमृडानीविन्ध्यवासिनी सिद्धविद्यामहाशक्तिःपृथ्वीनारदसेविता पुरुहू
तप्रियाकान्ताकामिनीपद्मलोचना प्रह्लादिनीमहामातादुर्गादुर्गतिनाशिनी
ज्वालामुखीसुगोत्राचज्योतिःकुमुदवासिनी दुर्गमादुर्लभाविद्यास्वर्गतिः
पुरवासिनी अपर्णाशाम्बरीमायामदिरामृडहासिनी कुलवागीश्वरी

नित्यानित्यक्लिन्ना कृशोदरी कामेश्वरी च नीला च भेरुंडा वह्निवासिनी लंबोदरी महाकाली
भ· विद्या विद्येश्वरी तथा नरेश्वरी च सत्या च सर्वसौभाग्यवर्धिनी संकर्षिणी नारसिंही वैष्ण
२८ वी च महोदरी कात्यायिनी च चंपा च सर्वसंपत्तिकारिणी नारायणी महानिद्रा योगनि
द्रा प्रभावती प्रज्ञापारमिता प्रज्ञा तारा मधुमती मधु क्षीरार्णव सुधाहारा कालिका सिंह ६
वाहना ॐकारा वसुधाकारा चेतना कोपनाकृतिः अर्धबिंदुधराधारा विश्वमाता क
लावती पद्मावती सुवस्त्रा च प्रबुद्धा च सरस्वती कुंडासीना जगद्धात्री बुद्धमाता जिनेश्व
री जिनमाता जिनेंद्रा च शारदा हंसवाहना राज्यलक्ष्मी वषट्कारा सुधाकारा सुधात्मि
का राजनीतिस्त्रयीवार्ता दंडनीतिः क्रियावती सद्भूतिस्तारिणी श्रद्धा सद्गतिः सत्परा
यणा सिंधुर्मंदाकिनी गंगा यमुना च सरस्वती गोदावरी विपाशा च कावेरी च शता
द्रुका सरयूश्चंद्रभागा च कौशिकी गंडकी शुचिः नर्मदा कर्मनाशा च चर्मण्वती च
देविका वेत्रवती वितस्ता च वरदा नरवाहना सती पतिव्रता साध्वी सुचक्षुः कुंडवासि
नी एकचक्षुः सहस्राक्षी सुश्रोणिर्भगमालिनी सेनाश्रेणिः पताका च सुव्यूहा यु
द्धकांक्षिणी पताकिनी दयारंभा विपंची पंचमप्रिया परापरकला कांता त्रिशक्ति
र्मोक्षदायिनी ऐंद्री माहेश्वरी ब्राह्मी कौमारी कुलवासिनी इच्छा भगवती शक्तिः
कामधेनुः कृपावती वज्रायुधा वज्रहस्ता चंडी चंडपराक्रमा गौरी सुवर्णवर्णा
च स्थितिसंहारकारिणी एकानेका महेज्या च शतबाहुर्महाभुजा भुजंगभूष

णाभूषा बद्धचक्रक्रमवासिनी षट्चक्रभेदिनी श्यामा कायस्था कायवर्जिता सुस्मिता सु-
मुखी क्षामा मूलप्रकृतिरीश्वरी अजा च बहुवर्णा च पुरुषार्थप्रवर्त्तिनी रक्ता नीला सिता श्या-
मा कृष्णा पीता च कर्बुरा क्षुधा तृष्णा जरा वृद्धा तरुणी करुणालया कला काष्ठा मुहूर्त्ता च नि-
मेषा कालरूपिणी सुवर्णरसना नासा चक्षुः स्पर्शवती रसा गन्धप्रिया सुगन्धा च सुस्पर्शा
च मनोगतिः मृगनाभिर्मृगाक्षी च कर्पूरामोदधारिणी पद्मयोनिः सुकेशी च सुलिङ्गा भगरूपि-
णी योनिमुद्रा महामुद्रा खेचरी खगगामिनी मधुश्रीर्माधवी वल्ली मधुमत्ता मदोद्धता मा-
तङ्गी शुकहस्ता च पुष्पबाणेक्षुचापिणी रक्ताम्बरधरा क्षीवा रक्तपुष्पवतंसिनी शुभ्राम्बरधरा
धीरा महाश्वेता वसुप्रिया सुवेणी पद्महस्ता च मुक्ताहारविभूषणा कर्पूरामोदनिश्वासा
पद्मिनी पद्ममन्दिरा खड्गिनी चक्रहस्ता च त्रिशूलवरधारिणी चापिनी पाशहस्ता च भु-
शुण्डी परिघायुधा सबाणा शक्तिहस्ता च मयूरवरवाहना वरायुधधरा वीरा वीरपानमदो-
त्कटा वसुधा वसुधारा च जया शाकम्भरी शिवा विजया च जयन्ती च सुस्तनी शत्रुनाशिनी अं-
तर्वत्नी वेदशक्तिर्वरदा वरदायिनी शीतला च सुशीला च बालग्रहविनाशिनी कुमारी
च सुपर्वा च कामाख्या कामवन्दिता ज्वालन्धरपदानेता कामरूपनिवासिनी कामबी-
जवती सत्या सत्यधर्मपरायणा स्थूलमार्गस्थिता सूक्ष्मा सूक्ष्मबुद्धिः प्रबोधिनी ष-
ट्कोणा च त्रिकोणा त्रिनेत्रा त्रिपुरसुन्दरी वृषप्रिया वृषारूढा महिषासुरघातिनी
शुम्भदर्पहरा दीप्ता दीप्तपावकसन्निभा कपालभूषणा काली कपालमालाधारिणी कपा-
लकुण्डला दीर्घा शिवदूती घनध्वनिः सिद्धिदा बुद्धिदा नित्या सत्यमार्गप्रबोधिनी कंबु-

५८ ग्रीवा वसुमती कुम्भका याकृतालया जगद्गर्भा कुण्डलिनी भुजगाकारशालिनी प्रोल्लसत्सप्तपद्मा
२५ चनाभिनालमृणालिनी मूलाधारा निराकारा वह्निकुण्डकृतालया वायुकुण्डसुखासीना निरा
धारा निराश्रया श्वासोच्छ्वासगतिर्जीवा ग्राहिणी वह्निसंश्रया वल्लीतन्तुसमुत्थाना षड्रसास्वा
दुलोलुपा तपस्विनी तपःसिद्धि तपसः सिद्धिदायिनी तपोनिष्ठा तपोयुक्ता तापसी च तपः
प्रिया सप्तधातुमयी मूर्तिः सप्तधात्वन्तराश्रया देहपुष्टिर्मनःपुष्टिरन्नपुष्टिर्बलोद्धता औष
धि वैद्यमाता च द्रव्यशक्तिः प्रभावती वैद्या वैद्यचिकित्सा च सुपथ्या रोगनाशिनी मृ
गया मृगमांसादा मृगत्वङ्मृगलोचना वागुरा बन्धरूपा च बद्धरूपा वधोद्धता वन्दीव
दिस्तुता कारा कारावन्धविमोचिनी शृङ्खला खलहा विद्युत् दृढबन्धविमोचिनी अम्बि
का बालिका चाम्बा सुन्दरा मापतञ्जनार्चिता कौलिकी कुलविद्या च सुकुला कुलपूजिता
कालचक्रभ्रमा भ्रान्ता विभ्रमा भ्रमनाशिनी वात्याली मेघमाला च सुवृष्टिः सस्यवर्धिनी
अकारा च इकारा च उकारैकाररूपिणी ह्रींकारी बीजरूपा च क्लींकारांबरवासिनी
सर्वाक्षरमयी शक्तिरक्षरा वर्णमालिनी सिन्दूरारुणवर्णा च सिन्दूरतिलकप्रिया वश्या च व
श्यबीजा च लोकवश्यविभाविनी नृपवश्या नृपैः सेव्या नृपवश्यकरी प्रिया महिषी नृ
पमान्या च नृमान्या नृपनन्दिनी नृपधर्ममयी धन्या धनधान्यविवर्धिनी चतुर्वर्णमयी
मूर्तिः चतुर्वर्णैश्च पूजिता सर्वधर्ममयी सिद्धिः चतुराश्रमवासिनी ब्राह्मणी क्षत्रि
यी वैश्या शूद्रा च वरवर्णजा वेदमार्गरता यज्ञा वेदविश्वविभाविनी अस्त्रशस्त्र
मयी विद्या वरशस्त्रास्त्रधारिणी सुमेधा सत्यमेधा च भद्रकाल्यपराजिता गाय

श्रीसन्कृतिः सन्ध्यासावित्रीत्रिपदाश्रया त्रिसन्ध्या त्रिपदी धात्री सुपर्वासामगायिनी पांचा
ली वालिका वाला वालक्रीडा सनातनी गर्भाधारधरा शून्या गर्भाशयनिवासिनी सुरारि
घातिनी कृत्या पूतना च तिलोत्तमा लज्जा रसवती नन्दा भवानी पापनाशिनी पट्टांबर
धरा गीतिः स्वगीतिर्ज्ञानलोचना सप्तस्वरमयी तंत्री षड्जमध्यमदैवता मूर्छना ग्रामसं
स्थाच स्वस्था स्वस्थानवासिनी अट्टाट्टहासिनी प्रेता प्रेतासननिवासिनी गीतनृत्यप्रिया
कामा तुष्टिदा पुष्टिदा क्षया निष्ठा सत्यप्रिया प्रज्ञा लोकेशी च सुरोत्तमा सविषाज्वालिनी
ज्वाला विषमोहार्तिनाशिनी विषारिर्नागदमनी कुरुकुल्लामृतोद्भवा भूतभीतिहरा र
क्षा भूतावेशविनाशिनी रक्षोघ्नी राक्षसी रात्री दीर्घनिद्रा दिवागतिः चंद्रिका चंद्रकां
तिश्च सूर्यकान्तिर्निशाचरी डाकिनी शाकिनी शिष्या हाकिनी चक्रवाकिनी सितासित
प्रिया स्वंगा सकलावनदेवता गुरुरूपधरा गुर्वी मृत्युर्मारी विशारदा महामारी विनि
द्रा च तंद्रा मृत्युविनाशिनी चंद्रमण्डलसंकाशा चंद्रमण्डलवासिनी अणिमादिगुणो
पेता सुस्पृहा कामरूपिणी अष्टसिद्धिप्रदा प्रौढा दुष्टदानवघातिनी अनादिनिध
ना पुष्टिः चतुर्बाहुश्चतुर्मुखी चतुःसमुद्रशयना चतुर्वर्गफलप्रदा काशपुष्पवती
काशा शरत्कुमुदलोचना भूता भव्या भविष्या च शैलजा शैलवासिनी वाममार्गर
ता वा श्रिव वामंगवासिनी वामाचारप्रिया तुष्टिर्लोपामुद्रा प्रबोधिनी भूतात्मा प
रमात्मा च भूतभावविभाविनी मंगला च सुशीला च परमार्थप्रबोधिका दक्षि
णा दक्षिणामूर्त्तिः सुदक्षिणा हरिप्रिया योगिनी योगयुक्ता च योगांगाध्याने

भ. शालिनी योगपटप्रा मुक्तिर्मुक्तानां परमा गतिः नारसिंही सुजन्मा च त्रिवर्गफलदायिनी धर्मदा ध
नदा चैव कामदा मोक्षदाकृतिः साविणी द्याणदा दक्षा दक्षजा कोटिरूपिणी क्रतुः कात्यायनी
२० स्वच्छा स्वच्छंदा च कविप्रिया सत्यागमा बहिःस्था च काव्यशक्तिः कवित्वदा मेनापुत्री सती मा
ता मैनाकभगिनी तडित् सौदामिनी सुधामा च सुधामा धामशालिनी सौभाग्यदायिनी द्यौश्च सु
भगा द्युतिवर्धिनी श्रीः कृत्तिवसना चैव कंकाली कलिनाशिनी रक्तबीजवधोद्रिक्ता सुतं
तुः बीजसंततिः जगज्जीवा जगद्बीजा जगत्त्रयहितैषिणी चामीकररुचिश्चांद्री साक्षाद्याषो
डशी कला यत्तत्पदानुबंधा च यक्षिणी धनदार्चिता चित्रिणी चित्रमाया च विचित्रा भुवने
श्वरी चामुंडा मुंडहस्ता च चंडमुंडवधोद्धुरा अष्टम्येकादशी पूर्णा नवमी च चतुर्दशी अमा
कलशहस्ता च पूर्णकुंभधरा धरा अभीरुर्भैरवी भीरा भीमा त्रिपुरसुन्दरी महाचंडा
च रौद्री च महाभैरवपूजिता निर्मुंडा हस्तिनी चंडा करालदशनानना करालाविकरा
ला च घोरघुर्घुरनादिनी रक्तदंतोर्ध्वकेशी च बन्धूककुसुमारुणा कादंबरी पटासा च
काश्मीरी कुंकुमप्रिया क्षांतिर्बहुसुवर्णा च रतिर्बहुसुवर्णदा मातंगिनी वरारोहा मत्त
मातंगगामिनी हंसा हंसगतिर्हंसी हंसोज्ज्वलशिरोरुहा पूर्णचंद्रमुखी श्यामा स्मि
तास्या श्यामकुंडला मषी च लेखनी लेख्या सुलेखा लेखकप्रिया शंखिनी शंखहस्ता च श्री
जलस्था जलदेवता कुरुक्षेत्रावनिः काशी मथुरा कांची अवंतिका अयोध्या द्वारिका मा
या तीर्था तीर्थकरप्रिया त्रिपुष्करा अप्रमेया च कोशस्था कोशवासिनी कौशिकी च कुशा
वर्ती कौशांबी कोशवर्धिनी कोशदा पद्मकोशाक्षी कुसुमा कुसुमप्रिया तोतला
च तुला कोटिः कोटिस्था कोटराश्रया स्वयंभूश्च सुरूपा च स्वरूपा रूपवर्धिनी ते

जस्विनी तुष्टिदा च बलदा बलदायिनी महाकोषी महावार्ता बुद्धिः सदसदात्मिका
महाग्रहहरा सौम्या विशोका शोकनाशिनी सात्त्विकी सत्त्वसंस्था च राजसी च र
जोवृता तामसी च तमोयुक्ता गुणत्रयविभाविनी अव्यक्ता व्यक्तरूपा च वेद
विद्या च शांभवी शंकरा कल्पिनी कल्पा मनःसंकल्पसंततिः सर्वलोकमयी
शक्तिः सर्वश्रवणगोचरा सर्वज्ञानवती वांछा सर्वतत्त्वावबोधिनी जागृती
च सुषुप्तिश्च स्वप्नावस्था तुरीयका त्वरा मन्दगतिर्मंदा मदिरामोदधारिणी
पानभूमिः पानपात्रा पानदानकरोद्यता आघूर्णारुणनेत्रा च किंचिदव्यक्त
भाषिणी आशापूरणी च दीक्षा च दक्षा दीक्षितपूजिता नागवल्ली नागकन्या
भोगिनी भोगवल्लभा सर्वशास्त्रवती विद्या सुस्मृतिर्धर्मवादिनी श्रुतिः श्रु
तिधरा ज्येष्ठा श्रेष्ठा पातालवासिनी मीमांसा तर्कविद्या च सुभक्तिर्भ
क्तवत्सला सुनाभिर्यातना जातिर्गंभीरा भाववर्जिता नागपाशधरा मूर्ति
रगाधा नागकुंडला सुचक्रा चक्रमध्यस्था चक्रकोणनिवासिनी सर्वमं
त्रमयी विद्या सर्वमंत्राक्षरावलिः मधुस्रवा स्रवंती च भ्रामरी भ्रमरालकः
मातृमंडलमध्यस्था मातृमंडलवासिनी कुमारजननी क्रूरा सुमुखी
ज्वरनाशिनी अतीता विद्यमाना च भाविनी प्रीतमंजरी सर्वसौख्यवती
युक्तिराहारपरिणामिनी निदानं पंचभूतानां भवसागरतारिणी
अक्रूरा च ग्रहवती विग्रहा ग्रहवर्जिता रोहिणी भूमिगर्भा च काल
भूः कालवर्तिनी कलंकरहिता नारी चतुःषष्ट्यभिधावती जीर्णा

चजीर्णवस्त्राचनूतनानववल्लभा अराजाश्चरतिः प्रीतिरतिरागविवर्धिनी पंच
भं. वानुगतिर्भिन्नापंचश्लेष्माशयाधरा पंचपित्तवती पुष्टिः पंचस्थानविभोधिनी
३१ उदक्याचवृषस्यंती वह्निः प्रस्रविनीत्तरूम् रजः शुक्रधराशक्तिर्जरायुर्गर्भ
धारिणी त्रिकालज्ञा त्रिलिंगा त्रिमूर्त्तिस्त्रिपुरवासिनी अरागाशिवतत्वाचका
मतत्वानुरागिणी प्राच्यवाचीप्रतीचीदिगुदीचीदिग्विदिग्दिशः अहंकृतिर
31 हंकारा वलमायावलिप्रिया स्रुक्स्रुवा सामिधेनीचसुश्रद्धाश्राद्धदेवता
माता मातामही तृप्तिः पितृमाता पितामही स्नुषा दौहित्रिणी पुत्री पौत्री
नप्त्री शिशुप्रिया स्तनदास्तनधाराचविश्वयोनिः स्तनंधयी शिशूत्संग
धरादोलादोलाक्रीडाभिनंदिनी उर्वशी कदलीकेका विशिखा शिखिव
र्तिनी खट्वांगधारिणी खड्गबाणपुंखानुवर्तिनी लक्ष्यप्राप्तिः करा
लक्ष्यालक्ष्याचशुभलक्षणा वर्तिनी सुपथाचारा परिखाचखनिर्वृतिः
प्राकारवलयावीलामर्यादाचमहोदधेः पोषणी शोषणी शक्तिर्दीर्घके
शीसुलोमशा ललिता मांसला तन्वी वेदवेदांगधारिणी नरास्रक्पानम
त्ताचनरमुंडास्थिभूषणा अक्षक्रीडारतिः शारी शारिकाशुकभाषि
णी शांभरीगारुडीविद्यावारुणीवरुणार्चिता वाराहीमुंडहस्ताचदं
ष्ट्रोद्धृतवसुंधरा मीनमूर्तिधरामूर्तावदान्याप्रतिमाश्रया अमूर्तानि
धिरूपाचसालिग्रामशिलाशुचिः स्मृतिसंस्काररूपाचसुसंस्कारा
यसंस्कृतिः प्राकृतादेशभाषाचगाथागीतिः प्रहेलिका इडाचपिंग

क

लापिंगा सुषुम्णा सूर्यवाहिनी शशिहवाचतालुस्था काकिनी मनजी
विनी अनुरूपा बृहद्रूपा लक्ष रूपा गुह्यरा स्थावरा जंगमा देवी कृत
कर्मफलप्रदा विषयाक्रान्तदेहा च निर्विशेषा जितेंद्रिया विश्वरूपा।
चिदानन्दा परंब्रह्मप्रबोधिनी निर्विकारा च निर्वैरा विरतिः सत्यवर्धिनी
पुरुषा ज्ञा च भिन्ना चदांतिः कैवल्यदायिनी विविक्तसेविनी प्रज्ञा जन
यित्री वहुश्रुतिः निरीहा च समस्तैका सर्वलोकैकसेविता सेवा सेव्या प्रिया
सेव्या सेव्याफलविवर्धिनी कलौकल्किप्रिया काली दुष्टम्लेछविनाशिनी
प्रत्यंचा च धनुर्यष्टिः खड्गाधारा दुरागतिः अश्वप्लुतिश्च वल्गा च सृणिः
सन्मत्तवारणा वीरभूर्वीरमाता च वीरसूर्वीरनन्दिनी जयश्रीर्जयदीक्षा
च जयदा जयवर्धिनी सौभाग्यसुभगाकारा सर्वसौभाग्यवर्धिनी क्षे
मंकरी सिद्धिरूपा सत्कीर्तिः पथिदेवता सर्वतीर्थमयी मूर्तिः सर्वदेव
मयी प्रभा सर्वसिद्धिप्रदा शक्तिः सर्वमंगलमंगला पुण्यसहस्रना
मेदं मवायारुद्रभाषितम् चतुर्वर्गप्रदं सत्यं नन्दिकेन प्रकाशितं
नातः परतरं विद्या नातः परतरस्तुतिः नातः परतरो मंत्रस्तीर्थं नातः परं
परं तेधन्याः कृतपुण्यास्ते त एव भुवि पूजिताः एकभाव मुदा नित्यंय
चेयंती मरुं शरीम देवतानां देवताया ब्रह्मा धैर्या च पूजिता भूयात्साव
रदा लोके साधूनां विश्वमंगला एतामेव पुरा राध्य विद्यां त्रिपुरसुन्दरीम्
त्रैलोक्यमोहनं रूपमकार्षीद्भगवान्हरिः इति श्रीरुद्रयामले तंत्रे नन्दिकेश्वरसं